CC-0. In Public Domain. Digitization by eGangotri

CONTENTS

PART—A

		Pages
१	गुरुवायुपुरेशाष्टकम्	1—2
२	धातुरत्नावली	41—102
३	अर्चिरादिमार्गवैभवम्	1—13

PART—B

1	Kṛtyaratnāvalī (Title Pages, Introduction, Index etc.)	1–70
2	Dhāturatnāvalī (Title Pages, Introduction, Index etc.)	1—35
3	Pūrva Mímamsā and Astrological Interpretation (Dr. S. G. Moghe)	1—21
4	Vikṛtis in Vedic recitation (Dr. S. Venkitasubramonia Iyer)	1—6

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

PART - A

Vol. XXII Part - II

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

गुरुवायुपुरेशाष्टकम्

नारायणाच्युत हरे नरकप्रमाथिन्
नाथ त्वमेव शरणं करुणापयोधे ।
आरोग्यसम्पदमनुग्रहमर्पयन् मे
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ १ ॥

मञ्जुस्फुरन्मकरकुण्डलशोभिगण्डं
मन्दस्मितामृतमनोज्ञमुखेन्दुबिम्बम् ।
वन्दे विलोलवनमालभुजान्तरं त्वां
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ २ ॥

मायूरपिञ्छपरिलाञ्छितकेशव (न्धं)
बन्धूकशोणरुचिपाणिपदाधरोष्ठम् ।
ध्यायामि कोमलकलायनिभं वपुस्ते
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ३ ॥

शङ्खारिपङ्कजगदाङ्कचतुर्भुजीकं
संसक्तसार (ध? सन) नूतनपीतचेलम् ।
चित्ते विभातु मम कृष्ण तव स्वरूपं
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ४ ॥

This stotra in praise of ShriKrishna the deity of Guruvayoor temple in Kerala is taken from the Ms.No.686?.of OR I and Mss.Library.

CC-0. In Public Domain. Digitization by eGangotri

अद्वैतसान्द्रममलं कमलाधिवासं
सत्त्वात्मकं सततभास्वरमप्रमेयम् ।
वन्दे भवन्तमतिकाममनन्तमाद्यं
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ५ ॥

दोषत्रयव्यतिकरप्रभवान् गदान् मे
हातुं गुणत्रयतनो भगवन् (मिमेथा ?)।
दासोऽस्मि ते दनुसुतान्तक दीनबन्धो
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ६ ॥

त्वं मे गतिस्त्वमसि केवलदैवतं मे
त्वं मे समस्तमपि जन्मफलं मुरारे ।
त्वं मे चकास्ति हृदि सर्वचराचरात्मन्
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ७ ॥

श्रीकृष्ण माधव जनार्दन वासुदेव
श्रीकान्त कान्तवपुषे शरणं नमस्ते ।
व्याधीनपाकुरु दुरार्तिकृतोऽखिलान् मे
देव प्रसीद गुरुवायुपुरेश विष्णो ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

धातुरत्नावली

Contd. from Vol. XXII — Part I

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

ताडे ताटयतीति चौ, शपि नुमा तण्डेत, हिंसाभिदो–
स्तोडेत् तुण्डत इत्युभौ शपि कुटादित्वात् तुडेदित्यपि ।
चौ वाग्दीपनयोरतोडयद,वज्ञायामतोडद् भवे --
च्छप्येवाथ वधे कुटादिपठिताभ्यां द्वौ द्रुडेद् द्रूडति ।। १५५ ।।

व्यक्तवाचि पडेद् गत्यां पण्डते तङ्युभौ शपि ।
नाशने पण्डयेत् पण्डेत् पण्डयेत त्रयोऽपि चौ ।। १५६ ।।

शपि चौ पिडि सङ्घाते पिण्डेतेति तङादिमे ।
अपिपिण्डत पिण्डेदप्यपिपिण्डद(था)न्तिमे ।। १५७ ।।

पिड शब्दसङ्घयोः शपि पेडेदथ पीड बाधगाहनयोः ।
चौ ह्रस्वेऽपीपिडदिति चङ्येव स्यात् पिडेरपि णौ ।। १५८ ।।

---

१५५ तड आघाते X. उ. तडि ताडने I. आ. तुडृ तोडने I. प. तुडि तोडने I. आ. तोडनं 'दारणं हिंसनं वा तत्' प्र. तुड तोडने VI. प. कुटादिः । तुड भाषा(सा)र्थः X. उ. प्र. तुडि इति मैत्रेयः । मा. 'तोडृनादरे' क. १५९. 'तोडृ अनादरे' प्र. क, 'द्रुड द्रूड निमज्जने' प्र. क. 'दुड् द्रुड् शि मज्जने' क. १६०. वधार्थो न दृष्टः ।

१५६ 'पठ व्यक्तायां वाचि I. प. डान्तं पडति' प्र. पडि गतौ I. आ. पडि नाशने X. उ.

१५७ पिडि संघाते I. आ. पिडि संघाते X. उ.

१५८ 'पिट शब्दसंघातयोः I. प. पिट शब्दे अर्थभेदात् द्विः पाठः । पिड इत्येके' क्षी. 'पीड अवगाहने X. उ. मा. 'पीड गहने X. उ. गहनं बाधनम्' क्षी. 'बाधनगाहनयोरिति द्रुमे' प्र. 'पीडृक् बाधगाहे' क. १६१.

CC-0. In Public Domain. Digitization by eGangotri

खण्डमर्दनयोर्द्वाभ्यां क्रमात् पुण्डति पोडति ।
छेदनोत्सर्गयोर्द्वाभ्यां कुटादौ पु(ट ? ड)ति क्रमात् ।। १५९ ।।

परिहासे सनिन्दोक्तौ परितो भाषणेऽपि च ।
भण्डते शपि कल्याणे चौ भण्डयति भण्डति ।। १६० ।।

भूषायां मण्डति विभाजने मण्डेत तङ्यसौ ।
शपि द्वावथ भूषायां चौ मण्डयति मण्डति ।। १६१ ।।

शुद्धिन्यग्भवनार्थयोः शपि नुमा मुण्डेन्न चौ मर्दन-
च्छिद्योर्मुण्डति मुण्डयेत मुड उत्सर्गे कुटादौ मुडेत् ।
खण्डे मुण्डति मर्दने पुनरमोडद् द्वौ शपीमावथो
मृड्नातीति विमर्दमोदनमुदास्वन्त्ये मृडेदित्यपि ।। १६२ ।।

---

१५९ 'मुडि खण्डनप्रमर्दनयोः इति कण्ठः' पुरुषकारः (P. 64.) 'पुडीत्येके' क्षी. (P.55.) I. प. 'पुडेति शाकटायनपाठः' मा. पुड छेदने पुड उत्सर्गे VI. प. कुटादिः ।

१६० 'भडि परिभाषणे I. आ. तच्च परितो भाषणं सनिन्दवचनं वा । परिहास इत्येके' प्र. भडि कल्याणे X. उ.

१६१ मडि भूषायाम् I. प. मडि विभाजने I. आ. मडि भूषायाम् X. उ.

१६२ 'मुडि मार्जने I. प. शुद्धिन्यग्भावौ तत्' प्र. 'चुडि च्छेदने मुडि मर्दने च' X. उ. प्र. क. 'मुडि च्छिदि मर्दे' क. १६३. 'पुड उत्सर्गे VI प. कुटादिः । मुड इत्यात्रेयः' मा. मुडि खण्टने I. प. 'मुट प्रमर्दने I. प. मुडेति धनपालः' मा. मृद क्षोदे IX. प. मृड च. मृड सुखे च इति केचित् । मृड सुखने इत्यपरे' मा. मृड सुखने VI. प.

CC-0. In Public Domain. Digitization by eGangotri

चौर्ये रुण्डत्यथोन्मादे हेलनेऽपि च रोडति ।
रोड्योरथ रुड स्नाने रुडेदिति कुटादितः ।। १६३ ।।

उत्क्षिप्यलण्डयत लण्डति, दीपनोक्त्यां
चेमा,वलीलडदलीलडतोपसेवे ।
(पीडा ? वीप्सा)र्थिनस्तु तङ्लीलडतेति चौ वि–
लासे लडेदिति शपि क्वचिदस्य मित्त्वम् ।। १६४ ।।

श्लेषे कुटादावलुडद् विलोटने
लोडेच्चुरायां शपि रुण्डतीति हि ।
अलोडदित्युन्मदने, विभाजने
वण्डेत, चौ वण्डति वण्डयेदुभौ ।। १६५ ।।

स्युः शपि विशीर्णतायां स्फोडेत् स्फुण्डेत्तथास्फुडदिरित्त्वात् ।
संवरणे स्फुडति परीहासे चौ स्फुण्डयेत् स्फुण्डेत् ।। १६६ ।।

---

१६३ रुडि स्तेये I. प. रोड़ उन्मादे I. प. 'रोड़ अनादरे I. प.' प्र. 'रौड़' मा-रुड स्नाने न दृष्टः ।

१६४ ओ लडि उत्क्षेपणे X. उ. लडि भाषा(सा)र्थः X. उ. लड उपसेवायाम् X. उ. 'लड ईप्सायाम् X. आ. लाडयते' प्र क. "लड ङ क् वीप्से' क. १६५. लड विलासे I. प. 'जिह्वोन्मथने लडिः' घटादिः ।

१६५ लुड् संश्लेषणे VI. कुटादिः । लुड विलोडने I. प. 'लुटि स्तेये I. प. लुडि इत्यपरे' धातुकाव्यव्याख्यायां पाठभेदः । लोड़ उन्मादे I. प. वडि विभाजने I. प. वडि विभाजने X. उ.

१६६ 'स्फुटिर् विशरणे I. प. स्फुट स्फुटि स्फट इत्येके' प्र. डान्तपाठो न दृष्टः । इरित्त्वाद् वा अङ् । अङ्भावे अस्फोटीदिति । स्फुड संवरणे VI.प. स्फुडि परिहासे X. उ. 'स्फुड शि वृत्यां, स्फुडिङ् फुल्ले, स्फुटिक् नर्मणि. क. १६८.

CC-0. In Public Domain. Digitization by eGangotri

गत्यनादरयोर्हिण्डेतान्त्ये हेडेत तङयुभौ ।
वेष्टनाक्रोशयोर्हेडेद् वेष्टने मिदमी शपि ।। १६७ ।।

सङ्घाते हुण्डेत गत्यामहोडि–
ष्टाहूडिष्टानादरे होडते तङ ।
गत्यां होडेद्धूडतीत्यप्यहोड–
च्छप्येते सङ्घाप्लवे शे हुडेत् स्यात् ।। १६८ ।।

प्राणेऽण्येत रवे शप्यणेत् कणेदन्तिमस्तु गत्यां च ।
तत्र मिता कणयेदथ निमीलने काणयेदिति (चौ) ।। १६९ ।।

चौ सङ्कोचामन्त्रणयोः कुणापयेदुपकृतौ रवे च कुणेत् ।
सङ्कोचे कूणयते तङि चौ कुणापयेत् कथादिपुकि ।। १६० ।।

ग्रहणे नुमि घुण्णेत भ्रमणे घोणेत घूर्णते द्वौ स्तः ।
शप्येतेऽथान्त्यार्थे घुणेदघूर्णत् तुदादौ द्वौ ।। १७१ ।।

---

१६७ हिडि गत्यनादरयोः I. आ. हेड़ अनादरे I. आ. हेड वेष्टने I. प. घटादिः । आक्रोशार्थो मृग्यः । मित्त्वफलं हिडयतीत्यादौ ह्रस्वः ।

१६८ हुडि सङ्घाते I. आ. 'हुड् हूड् ह्‌ड ह्‌ड्ङ गतौ' क. १६८. होड़ अनादरे I. आ. होड़ गतौ I. प. हूड् गतौ I. प. 'हुड् शि तु मग्ने हूडिङ् च संघे क. १६८.

१६९ अण प्राणने IV. आ. अण शब्दे I. प. कण शब्दे I. प. कण गतौ I. प. घटादिः । कण निमीलने X. उ.

१७० कुण आमन्त्रणे X. उ. कूण संकोचने X. उ. उभावदन्तौ कथादी । कुण शब्दोपकरणयोः VI. प.

१७१ घुणि ग्रहणे I. आ. घुण भ्रमणे I. आ. घूर्ण भ्रमणे I. आ. घुण भ्रमणे VI. प. घूर्ण भ्रमणे VI. प.

CC-0. In Public Domain. Digitization by eGangotri

तनादौ दीपने घर्खोंत्यघर्णुत घृणोत्यपि ।
घृणुते चेति चत्वारो ग्रहणे शपि घृणते ।। १७२ ।।

दाने हिंसनगत्योश्च द्वाभ्यां शप्यचणत् क्रमात् ।
आद्याण्णौ चणयेदन्त्याच्चणयेच्चाणयेदुभौ ।। १७३ ।।

छेदे चुणेत् कुटादौ चौ सङ्कोचे चूणयेदिति ।
चूर्णयेदप्ययं प्रेरणेऽपि स्याद् धातुयुग्मतः ।। १७४ ।।

कौटिल्ये शे तुणेच्चौ पूरणे तूणयते तङि ।
सङ्कोचे तूणयेत् तूणापयेदन्त्यः कथादिगात् ।। १७५ ।।

शुभकर्मण्यपुणच्चौ सङ्घाते पूणयेत पूणयति ।
शपि रवगत्योर्द्वाभ्यामरणत् गत्यां मिता रणयेत् ।। १७६ ।।

---

१७२ घृणु दीप्तौ VIII. उ. उप्रत्ययनिमित्तो लघूपधगुणः 'संज्ञापूर्वको विधिरनित्य' इति न भवतीति मैत्रेयादयः। भवतीत्यन्ये, अतो रूपद्वयम् । घृणि ग्रहणे I. आ.

१७३ 'चण शब्दे, चण् मि गतौ हिंसे' क. १७३. हिंसार्थो द्रुममात्रदृष्टः । णिचि 'ह्रस्वो मिर् वा इति' (क. ११) णिचि विकल्पेन ह्रस्वः ।

१७४ 'शि चुण् छिदि' क. १७५. चुण् नान्यत्र । चूर्ण संकोचने X. उ. 'चूण' क्षी. चूर्ण प्रेरणे X. उ.

१७५ तुण कौटिल्ये VI. प. तूण पूरणे X. आ. आकुस्मीयः । 'तूण संकोचने तूणयति प्र. क. (अदन्तः) 'चूण तूण क् संकोचे' क. १७४. अन्त्यः संकोचार्थः ।

१७६ पुण कर्मणि शुभे VI. प. 'पूणक् संघाते' क. १७६. पूण नान्यत्र दृष्टः । रण शब्दार्थः I. प. रण गतौ I. प. घटादिः ।

CC-0. In Public Domain. Digitization by eGangotri

भुक्तावववर्णोद् वृणुते्ऽवृणोदव-
णंतापि चौ पूरणवर्णनार्थयोः ।
अवर्णयद् वर्णकृतौ गुणोक्तिवि-
स्तृतोश्च वर्णापयते कथादिगात् ।। १७७ ।।

दाने शपि श्रणेदस्य णौ पुनः श्रणयेन्मितः ।
चौरादिकस्य मित्त्वाभावेन श्राणयतीत्यपि ।। १७८ ।।

शप्यन्तेदिति बन्धने, सततगत्यां स्यादतेन्निग्रहे
सन्देहे व्यपनीतिनाशनचिकित्सादौ चिकित्सेदिति ।
ज्ञाने छान्दसतश्चिकेत्यथ निवासे केततीमे कितेः
केतेः केतयते कथादिषु निमन्त्रामणश्रा(स्रा)वणे ।। १७९ ।।

---

१७७ 'वृणु अदने VIII· उ. वर्णोति वर्णुते, वृणोति वृणुते' प्र· क. 'वृण् दुञ् भक्षे' क· १७७· संज्ञापूर्वकविधेरनित्यत्वात् 'पुगन्ते'ति लघूपधगुणस्य वैकल्पिकत्वे रूपद्वयसिद्धिः । 'वर्ण वर्णने प्रेरणेऽप्येके' X. उ· प्र. वर्ण वर्णक्रियाविस्तारगुण-वचनेषु X· उ. कथादिः ।

१७८ श्रण दाने I· प· घटादिः । श्रण दाने X· उ.

१७९ अति बन्धने I. प· अत सातत्यगमने I· प· कित निवासे रोगापनयने च I· प· 'अत्र निवासार्थो व्यर्थः । रोगापनयने हि सनुच्यते । संशयनिग्रहापनयन-नाशनादयश्चास्यार्थाः' प्र· 'कित ज्ञाने III. प· चिकेत्ति' प्र· क· 'र्लि कित् मतौ' क· १८०· 'कि ज्ञाने' इति माधवः । क्षीरस्वामी किकितावुभौ पठति । किभसयोरनन्तरं-'कित ज्ञाने चिकेति(?) ..... भ्वादौ कित निवासादौ केतति चिकित्सति इति निवासे केततीत्यप्युदाहृमत् । केत आमन्त्रणे X. उ· कथादिः। 'केत श्रावणे निमन्त्रणे च । श्रावणं समयोद्घोषणमिति द्रुमे । निमन्त्रणमाज्ञा । केतयत्यमात्यो जनान् । करदानाय समयं घोषयतीत्यर्थः' । प्र· 'केत त्क मन्त्रणे निश्रावणे' क· १८. 'अपरे तु पुनः पठन्ति केत स्रावणे निमन्त्रणे च' मा·

CC-0. In Public Domain. Digitization by eGangotri

मुचादौ छेदने कृन्तेद् रुधादौ वेष्टनेऽकृणत् ।
चौ स्युः संशब्दने कीर्तेदचिकीर्तदचीकृतत् ।। १८० ।।

चिन्तासन्धानचैतन्यज्ञानेषु शपि चेतति ।
चावाद्येऽचिन्तयच्चिन्तेदन्त्ये चेतयते तङि ।। १८१ ।।

ग्रन्थे वधे चृतेद् दीप्तौ यौ चर्तयति चर्तति ।
(जु? ज्यु) तिर् जुतृ प्रदीप्तौ शप्यजोतज्जोतते तङि ।। १८२ ।।

गतावैश्वर्येऽप्यपप्तदैश्वर्ये पत्यते पतेत् ।
शप्श्यन्शप्स्वर्थद्वये चौ पतामास पतापयेत् ।। १८३ ।।

---

१८० कृती छेदने VI. प. - कृती वेष्टने VII. प. कृत संशब्दने X. उ. दीर्घोच्चारण-सामर्थ्याण्णिचः पाक्षिकत्वम् । चङि अस्यासस्य ह्रस्वचुत्वे । धातोरलघुत्वाद् 'दीर्घो लघोः' इत्यभ्यासदीर्घाभावः । अचिकीर्तत् । 'उर्ऋत्' इति उपधायाः वैकल्पिके ऋकारे कृत् अत् । अभ्यासस्य उरदत्त्वम् । सन्यत इति इत्वम् । अलघुपरत्वाद् दीर्घः । अचीकृतत् ।

१८१ 'चिती संज्ञाने I. प. संज्ञानं चैतन्यम् । स्मरणार्थः सन्धानार्थोऽपि मा. चिति स्मृत्याम् X. प. चित संचेतने X. आ.

१८२ चृती हिंसाग्रन्थनयोः VI. प. 'चृत संदीपने X. उ. (विभाषितणिच्) । चर्तयति चर्तति' प्र. क. 'चृत् कि संदीपने' क. १८१. 'ज्युत जुतृ ङ द्युत्यां क. १८१. 'ज्युतृ भासने । ज्योतते' प्र. क.

१८३ पत्लृ गतौ I. प. 'पत् यङैश्ये, पत्लृ ज् गत्यां च' क. १८२. लृदित्त्वादङि अपप्तत् । पत गतौ वा X. उ (अदन्तत्वं णिच्च वा) कथादिः अनेकाच्त्वादाम् ।

CC-0. In Public Domain. Digitization by eGangotri

यत्ने यतेत शपि चौ संस्कारे परिभवे च यातयति ।
धनधान्यप्रतिदाने निर्यातयतीत्यसावपि चौ ॥ १८४ ॥

वर्तने वर्तते द्यौतादिको वरणसेवयोः ।
वृत्यते दीपनोक्त्योश्चौ वर्तयेद् वर्ततीत्युभौ ॥ १८५ ॥

ष्वर्त स्वर्त गतौ कृच्छ्रजीवने चादिमस्य षः ।
सिष्वर्तयिषते सिस्वर्तयिषेत द्वयस्य चौ ॥ १८६ ॥

वधे शपि क्रथेन्मित्त्वादक्रथ्यक्राथि चिण्युभौ ।
यौ चत्वारि क्रथेत क्राथयेत क्राथयेत् क्रथेत् ॥ १८७ ॥

कुथ कुन्थ श्लेषे श्नि द्वयोरकुथ्नान्नलोपतोऽन्त्यस्य ।
दौर्गन्ध्ये कुथ्यति, शपि हनने च क्लेशने कुन्थेत् ॥ १८८ ॥

---

१८४ यती प्रयत्ने I. आ. यत निकारोपस्कारयोः X. उ. 'परिभवसंस्कारौ तौ' प्र. 'निरश्च धान्यधनयोः प्रतिदाने च' मा.

१८५ वृतु वर्तने I. आ. द्युतादिः । वृतु वरणे IV. आ. 'वृत् वावृत् युङ संभक्तौ वरणे' क. १८३. वृतु भाषा(सा)र्थः X. उ. उदित्त्वाण्णिज्विकल्पः ।

१८६ स्वर्त गत्याम् X. उ. 'षोपदेश इति नन्दी' क्षी. श्वर्तेति माधवः । **'ष्वर्त स्वर्त गत्यां तङ्के'** क. १८४.

१८७ क्रथ हिंसायाम् I. प. घटादिः । 'मित्त्वफलं चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (६-४-९३) इति दीर्घविकल्पः । ग्रन्थ बन्धने इत्यत्र माधवः— **'अत्र देवमैत्रेयौ** क्रथ हिंसायामिति स्वरितेतं पठित्वा क्राथयति क्रथति क्रथते **इत्याहतुः'** । युजादित्त्वाण्णिज्बिकल्पः ।

१८८ कुन्थ संश्लेषणे IX. प. 'कुथेति दुर्गः' मा. नलोपः 'अनिदिता'मित्यादिना । **कुथ** पूतीभावे IV. प. स च दौर्गन्ध्यम् । कुथि हिंसाक्लेशनयोः I. प.

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भे यौ ग्रथेद् ग्रन्थेद् ग्राथयेद् ग्रन्थयेद् द्वयोः ।
ग्रथ्नाति श्न्यथ कौटिल्यशाठ्ययोर्ग्रन्थते शपि ।। १८९ ।।

पथे गतौ शपि पथेत् प्रक्षेपे पाथयेत चौ ।
चावेव पथि गत्यर्थे नुमि पन्थति पन्थयेत् ।। १९० ।।

दीपनोक्त्योः पोथयेत पोथयेच्चावथ श्यनि ।
हिंसायां पुथ्यति शपि क्लेशनेऽपि च पुन्थति ।। १९१ ।।

शपि प्रख्यानविस्तारार्थयोस्तङ प्रथते मितः ।
चौ प्रख्याने तथा प्रक्षेपार्थेऽपि प्रार्थयत्यमित् ।। १९२ ।।

क्लेशनवधयोरमथन्मन्थेन्मान्थेद् द्वयोर्द्वयोरन्त्यौ ।
मथने मथेदमन्थन्मथ्नात्या(द्य)श्शपीतर(:)श्नायाम् ।। १९३ ।।

---

१८९ ग्रन्थ सन्दर्भे X. उ. युजादिः । ग्रथधातुः युजादौ न दृश्यते । ग्रन्थ सन्दर्भे IX. प. ग्रथि कौटिल्ये I. आ. 'कौटिल्यं शाठ्यं वक्रता वा' । मा.

१९० पथे गतौ I. प. पथ प्रक्षेपे X. उ. पथि गतौ X. उ.

१९१ पुथ भाषा(सा)र्थः X. उ. पुथ हिंसायाम् IV. प. पुथि हिंसाक्लेशनयोः I. प.

१९२ 'प्रथ प्रख्याने' I. आ. घटादिः । 'विस्तारेऽप्यस्ति' प्र. प्रथ प्रख्याने X. उ. 'क्षेपेऽपि द्रुमे' प्र. 'पृथ क् । प्रक्षेपे, प्रथ् क च' क. १८७, १८८.

१९३ 'मथ् माथ लुथि कुन्थे' क. १८९. मथि हिंसाक्लेशनयोः I. प. मान्थ हिंसाक्लेशनयोः I. प. मथे विलोडने I. प. मन्थ विलोडने I. प. मन्थ विलोडने IX. प.

CC-0. In Public Domain. Digitization by eGangotri

मिथृ मेथृ वधे मेधावत्त्वे द्वाभ्यां च मेथते मेथेत् ।
विथृ वेथृ याचनार्थे वेथेदुभयोः शपीमे स्युः ।। १९४ ।।

चौ प्रख्यानयतनयोः श्राथयते मोक्षबन्धहननेषु ।
श्रथति श्राथयते यौ दौर्बल्ये तु श्रथापयति ।। १९५ ।।

विश्लेषागाधतयोः शप्यश्रन्थत विमोचने ग्रन्थे ।
श्रथ्नात्यथ सन्दर्भे वधे च यौ श्रन्थयेच्छ्रन्थेत् ।। १९६ ।।

अदि बन्धनेऽन्दति वधे भुक्तावप्यत्ति याचने गमने ।
अर्दति शपि हिंसायां यावर्दतार्दयेदर्देत् ।। १९७ ।।

---

१९४ मिथृ मेधाहिंसनयोः I उ. मेथृ मेधाहिंसनयोः I, उ. विथृ वेथृ याचने I. आ. आत्मनेपदित्वाद् वेथेदिति चिन्त्यम् ।

१९५ श्रथ प्रयत्ने X. प. 'प्रख्यान इत्यन्ये । प्रतिहर्ष इत्यन्ये' प्र. 'श्रथ मोक्षणे (X. उ. युजादिः) । बन्धने च द्रुमे । हिंसायां चैके । श्राथयति श्रथति' । प्र. 'श्रथ् कि बन्धे मोक्षे वधे' क. १८९. श्रथ दौर्बल्ये X. उ. कथादिः ।

१९६ श्रथि शैथिल्ये I. आ. शैथिल्यं विश्लिष्टतागाधता वा । श्रन्थ विमोचनप्रति-हर्षयोः IX. प. 'प्रतिहर्षो न ज्ञातः' प्र. ग्रन्थ सन्दर्भे IX. प. इत्यत्र 'श्रन्थ इत्यप्येके' प्र. 'श्रन्थ ग्रन्थ सन्दर्भे (X. उ. युजादिः) आद्यो हिंसायां च द्रुमे' प्र. 'श्रन्थ कि दर्भे वधे' क. १९०.

१९७ अदि बन्धने I. प. अद भक्षणे II. प. 'व्यत्यदन्ति वृका मेषान् इत्यादौ हिंसार्थोऽपि' प्र. अर्द गतौ याचने च I. प. अर्द हिंसायाम् X. उ. आधृषीयः ।

CC-0. In Public Domain. Digitization by eGangotri

रोदाकारणयोरकन्ददथ मिद् वैक्लव्यवैकल्ययो-
र्नुम् कन्देत कदेत चाऽक्रदत तङ क्रन्देत रोगादिके ।
क्रन्देदत्र गतार्थयोः, सततभावे त्वर्थं आक्रन्दये-
च्चावन्यार्थयुगे क्लदेत शपि च क्लन्देऽन्ययोः क्लन्दति ॥ १९८ ॥

शोकार्थे शपि धातुभ्यां क्लिन्दते क्लिन्दतीत्युभौ ।
क्लिद्द् आर्द्रीभाव एष इरिच्च क्लिद्य(ते? ति)श्यनि ॥ १९९ ॥

स्नेहनमोचनयोः श्यन्यक्ष्वेदीदक्ष्विदद् द्युतादौ तु ।
क्ष्वेदेत मोहनेऽप्ययमव्यक्तरवे शपि क्ष्वेदेत् ॥ २०० ॥

भुक्तौ खादेत् स्थिरतावधयोश्च खदेद्, वधे मुचादिगतात् ।
खिन्दति, दैन्ये खिन्ते खिद्येत श्नंश्यनोः क्रमतः ॥ २०१ ॥

---

१९८ कदि क्रदि क्लदि आह्वाने रोदने च I प. 'एते इदितोऽनिदितश्च । वैक्लव्यार्था घटादौ' प्र. 'कदि क्रदि क्लदि वैक्लव्ये I. आ. वैकल्य इत्येके' प्र. घटादिः । अत्र गतार्थयोः आह्वानरोदनयोः । आङः क्रन्द सतत्ये X. प. अन्यार्थयुगे वैक्लव्यवैकल्ययोः । अन्ययोः आह्वानरोदनयोः ।

१९९ क्लिदि परिदेवने I. आ. क्लिदि परिदेवने I. प. क्लिदू आर्द्रीभावे IV. प. 'क्लिद् यूइर् क्लिदि' क. १९४. पुषादित्वान्नित्याङिति अन्यत्र ।

२०० ञिक्ष्विदा स्नेहनमोचनयोः IV. प. इरित्त्वं द्रुमे 'इर् क्ष्विद् या' क. १९३. ञिक्ष्विदा स्नेहनमोचनयोः I. आ. द्युतादिः । स्नेहनमोहनयोः' क्षी. ञिक्ष्विदा अव्यक्ते शब्दे I. प.

२०१ खादृ भक्षणे I. प. खद स्थैर्ये हिंसायां भक्षणे च I. प. खिद परिघाते VI. प. मुचादिः । खिद दैन्ये VII. आ. IV. आ.

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तोक्तौ गदतीति स्यान्मेघशब्दे गदापयेत् ।
शब्दे गर्दति शप्येष गर्दयेद् गर्दयेत चौ ॥ २०२ ॥

पूर्वनिकेतनकेल्योश्चौ गूर्दयतेऽजुगर्दताथ शपि ।
केल्यां तङि गुर्दताऽगूर्दत वासे च गूर्दताद् गुर्दत् ॥ २०३ ॥

चदि आह्लादने दीप्तौ चन्दतीत्यथ याचने ।
चदते चदतीति द्वावेदितो निखिलं शपि ॥ २०४ ॥

संवरणे चौ छन्देच्छन्दयतेऽन्ततः छदापयति ।
यौ छादयति च्छदति च्छदतेऽन्त्यावूर्जने मिता छदयेत् ॥ २०५ ॥

छिदिर् द्वैधीकृतौ छिन्तेच्छिनत्त्यथ कथादिगः ।
छेद द्वैधीकृतौ छेदापयति च्छेदयेदिति ॥ २०६ ॥

---

१०२ गद व्यक्तयां वाचि I. प. स्तनगदी देवशब्दे X. उ. कथादिः । 'गदयति मेघः' प्र. गर्द शब्दे I. प. गर्द शब्दे X. उ.

२०३ गुर्द पूर्वनिकेतने X. उ. गुर्द क्रीडायाम् I. आ. कुर्द खुर्द गुर्द धातूनां 'उपधायां चे'ति दीर्घो वेति द्वैरूप्यम् । 'गुर्द गूर्द क्रीडानिवासयोः I. प. गुर्दति गूर्दति प्र. क. मुद्रिते द्रुमे नेमौ ।

२०४ चदि आह्लादने दीप्तौ च I. प. चदे याचने I. उ.

२०५ छदि संवरणे X. उ. छद अपवारणे X. उ. कथादिः । छद अपवारणे X. उ. आधृषीयः । छदिर् ऊर्जने I. प. घटादिः ।

२०६ छिदिर् द्वैधीकरणे VII. उ. छेद द्वैधीकरणे X. उ. कथादिः ।

CC-0. In Public Domain. Digitization by eGangotri

दीव्यत्यर्थवमनयोः श्नम्यच्छृणन्त च्छृणत्ति यौ दीप्तौ ।
छर्दयति च्छर्दति चौ वमनार्थे छर्दयत्येव ।। २०७ ।।

भाषादीपनयोश्चौ नादयतेऽव्यक्तनिस्वने नदति ।
हर्षे नन्दति शब्दे नर्ददुभयोः शपीह चत्वारः ।। २०८ ।।

कुत्से निन्दति णिदृ णेदृ सन्निकर्षे च नेदते नेदेत् ।
द्वाभ्यामेवमथो शे नुदते नुद(ते? ति)नुदे(त्)त्रयं क्षेपे ।। २०९ ।।

स्थैर्ये शपि पदति गतौ पद्येत पदापयेत तङयेव ।
आद्यार्थेऽत्र शपि बदेद् वन्दे(द? ता)भिवादननूतिनतिषु ।। २१० ।।

(बन्देत?)कल्याणे भन्दयते भन्दति चौ शपि सुखे [illegible] ।
अंशत्वे शपि भिन्देद् विदारणार्थे भिनत्ति भिन्ते द्वौ ।। २११ ।।

---

२०७ उछृदिर् दीप्तिदेवनयोः VII. उ. 'दीप्तिवमनयोरित्येके' प्र. छृदी सन्दीपने X. उ. आधृषीयः । छर्द वमने X. प.

२०८ णद भाषा(सा)र्थः X. उ. णद अव्यक्ते शब्दे I. प. टु नदि समृद्धौ I. प. 'समृद्धिर्हर्षे पर्यबस्यति' प्र. नर्द शब्दे I. प.

२०९ णिदि कुत्सायाम् I. प. णिदृ कुत्सासन्निकर्षयोः I. उ. णेदृ कुत्सासन्निकर्षयोः I. उ णुद प्रेरणे VI. उ. णुद प्रेरणे VI. प. क्षेपः प्रेरणम् ।

२१० 'बद स्थैर्ये I. प पदेति कण्ठः' क्षी. पद गतौ IV. आ. पद गतौ X. आ. आगर्वीयः कथादिः । वदि अभिवादनस्तुत्योः I. आ. 'लक्षणया नतिमात्रेऽपि' प्र.

२११ 'भदि कल्याणे X. उ. प्र. क. 'भदिक् शुभे' क. २०१. भदि कल्याणे सुखे च I. आ. भिदि अवयवे I. प. भिदिर् विदारणे VII. उ.

CC-0. In Public Domain. Digitization by eGangotri

कान्तिस्तुतोर्मदमुदोरलसत्वगत्यो–
मन्देत शप्यथ मदे श्यनि माद्यतीति ।
णौ दीनताप्रमदयोर्मदयेदमुष्य
चौ मादयेत तङि तर्पणशुद्धितृप्त्योः ।। २१२ ।।

स्नेहे मिन्देन्मिन्दयेन्मेदयेच्चौ
मेद्येन्मेदेत द्वयो (रङ? रिड्) विकल्पः ।
हिंसामेधावत्त्वयोर्मेदतेऽमे–
(दे? द) न्मेदेन्मेदेत मेदेर्मिदे (:) स्युः ।। २१३ ।।

हर्षे मोदेत सुरभीभाव आमोदते शपि ।
मुद संसर्ग इत्यस्य मोदयेन्मोदयेत चौ ।। २१४ ।।

यौ सन्देशोक्त्युक्त्योर्वादयेत वादयेद् वदेद् वदते ।
व्यक्तोक्तौ वदतीत्यभिवादननुतिनतिषु वन्देत ।। १२५ ।।

---

२१२ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु I. आ. 'स्वप्न आलस्यम्' । मा मदी हृष IV. प. मदी हर्षग्लेपनयोः '. घटादिः । मद तृप्तियोगे X. आ. आकुस्मीयः । 'तर्पणशुद्धावित्येके' प्र.

२१३ मिदि स्नेहने X. उ. 'मिद इत्येके' प्र. ञिमिदा स्नेहने IV. प. ञिमिदा स्नेहने I. आ. मिन्नं मेदितमित्यत्र 'विभाषा भावादिकर्मणोः इति इड्विकल्पः । मिदृ मेधाहिंसनयोः I उ. मेदृ मेधाहिंसनयोः I. उ.

२१४ मुद हर्षे I. आ. 'आङ्पूर्वः सुरभीभावे' प्र. मुद संसर्गे X. उ.

२१५ वद सन्देशवचने X. उ. आधृषीयः 'वचने च द्रुमे' प्र. 'वदक् वाक्सन्देशयोः' क. २०५. वद व्यक्तायां वाचि I. प वदिरिदित् २१० तमश्लोके उक्तः ।

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने वेत्त्यथ विद्यिते भुवि लभायां विन्दते विन्दति
श्ने विन्तां प्रविचारणेऽथ परिवादाख्यानवासेषु चौ ।
ज्ञाने च द्वितयस्य वेदयत ए(क?त)स्मात्तङेव प्रभा-
तीभावेऽपि च धूर्ततास्वपनयोः कण्ड्वादितो वेद्यति ।। २१६ ।।

तेजनविशरण(गतिषु)तङि शीयेतान्त्ययोश्च पीडायाम् ।
शपि शे च सीदति यावासादयति चासीदेत् ।। २१७ ।।

द्वौ ष्वद स्व(ा)द आस्वादे स्वदते स्वादते शपि ।
सिष्वादयिषते सिस्वादयिषेत क्रमेण चौ ।। २१८ ।।

---

२१६ विद ज्ञाने II. प. विद सत्तायाम् IV. आ. विद्लृ लाभे VI. उ. मुचादिः । विद विचारणे VII. आ. विद चेतनाख्याननिवासेषु X. आ. आकुस्मीयः । 'विद चेतनाख्यानपरिवादेषु इत्यपरे' मा. 'वेदनाख्याननिवासेषु' प्र. 'वेदनं ज्ञानम्' । प्र. वेद धौर्त्ये स्वप्ने प्रभाते च । कण्ड्वादिः ।

१२७ शद्लृ शातने I. प. तीक्ष्णीभावस्तत् । 'विशीर्णतायामित्येके । गतावप्यस्ति । शे चायम् । 'शदेः शितः' (१-३-६०) इति तङ' प्र. षद्लृ विशरण-गत्यवसादनेषु I, VI. 'पाघ्रा—' (७-३-७८) इति सीदादेशः । आङः षदः पद्यर्थे X. उ. आधृषीयः । णिजभावे सीदादेशः ।

२१८ ष्वद आस्वादने I. आ. स्वाद आस्वादने I. आ. ष्व षोपदेशस्य णिजन्तात् सनि आदेशसकारस्य षत्वम् । स्वादेः सस्यानादेशत्वान्न षत्वम् ।

CC-0. In Public Domain. Digitization by eGangotri

स्निग्धीभावे मोचने मोहनायां
स्वेदेत द्यौतादिकात् स्यात् पुषादेः ।
स्वेदे स्विद्येत् स्रावहिंस्योरसूद-
च्छप्यत्राद्यार्थे भवेत् सूदयेच्चौ ॥ २१९ ॥

वृद्धौ पौषादिकादृध्येच्छ्नावार्धनोद् वर्धनेऽप्यसौ ।
अर्दने गन्धयेतेति चौ तङ गन्धापयेत् पुकि ॥ २२० ॥

काङ्क्षायां गृधिरो गृध्यति गर्धेगर्धयेत चौ क्रीडायाम् ।
शपि गोधते श्यनि तु परिवेष्टने गुध्यति श्नि कोपेऽगुध्नात् ॥ २२१ ॥

बन्धे बध्नात्यथ चौ संयमने (बन्ध?बाधयेत) बाधयते ।
बन्धनकुत्सनयोर्बीभत्सेत प्रतिहतावबाधत तङ ॥ २२२ ॥

---

२१९ ञिष्विदा स्नेहनमोचनयोः I आ. द्युतादिः । 'मोहनयोरियेके' प्र. ञिष्विदा गात्रप्रक्षरणे IV. प. पुषादिः । 'षूद क्षरणे I आ. निस्सरणं तत् । हिंसार्थेऽप्ययमस्ति' प्र. असूददिति परस्मैपदं चिन्त्यम् । षूद क्षरणे X. उ.

२२० ऋधु वृद्धौ IV प. पुषादिः । ऋधु वृद्धौ V. प. गन्ध अर्दने X. आ. आकुस्मीयः । गन्धयतीत्यादयश्चुरादिष्वदन्ता' प्र.

२२१ गृधु अभिकाङ्क्षायाम् IV. प. 'गृधिर् । यु च लिप्से' क. २१२. 'गर्धं अभिकाङ्क्षायाम्' X. प. क्षी. 'गर्ध क च' क. २१२. 'गुध् ङ क्रीडे' क. २१२. गुध परिवेष्टने IV. प. गुध रोषे IX. प.

२२२ बन्ध बन्धने IX. प. बध संयमने X. उ. बध बन्धने I. आ. चित्तविकारे नित्यं सन् इति बन्धनाद्योक्तिर्व्यर्था । 'बधक् बन्धे बधङ निन्दे च' क. २१३. 'द्रुमे तु-निशातने बन्धनेऽपि तिजि बध्योः सनीरितः । ततस्तिति क्षते खड्गं बत्सान् बीभत्सते तथा' प्र. बाधृ लोडने I. आ. बाधनं प्रतिघातः ।

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने बोधेद् बोधते ज्ञापनेऽभौ–
त्सीदुद्बोधज्ञानयोर्बोधतीति ।
बुध्येताथो दर्शने बुन्धते बु–
न्धेच्छप्येते (हिंसने ? बोधने) बोधयेच्चौ ।। २२३ ।।

मिधृ मेधृ वधे मेधावत्त्वे च द्वितयं शपि ।
द्वाभ्यां मेधति मेधेत सङ्गमार्थेऽपि दीर्घवान् ।। २२४ ।।

पाके वधे रध्यति दैवचिन्ता--
प्रद्रोहसिद्ध्यादिषु राध्यतीति ।
सिद्धावराध्नोदथ कामनेऽनु–
रुध्येत रोधे तु रुणद्धि रुन्धे ।। २२५ ।।

---

२२३ बुधिर् बोधने I. उ. 'तच्च ज्ञानमेव' प्र. 'बुध अवगमने I. प. अवगमनं ज्ञापनम्' क्षी. 'उद्बोधज्ञाने अस्यार्थौ' प्र. उदाहरणद्वयमत्र त्रिष्वर्थेषु । 'बुध अवगमने IV. आ. 'ज्वलादिगतबोधतिवदुद्बोधो ज्ञानं चार्थः' प्र. 'उबुदिर् उबुन्धिर् निशामने' I. उ. प्र. क. 'बुध बोधने' X. उ. प्र. क. 'बुन्धिर् ञ् निशामने' क. २१३. 'बुन्धक् वधे' क. २१४. हिंसमे इति पाठे बुन्धयेच्चौ' इति स्यात् ।

२२४ मिदृ मेदृ मेधाहिंसनयोः I. उ. अयं पाठो देवादीनाम् । थान्तौ क्षीरस्वामिमते । धान्तौ न्यासपाठे. मेधृ संगमे च I. प.

२२५ रध हिंसासंराद्ध्योः IV. प. संराद्धिः पाकः । राध IV. प. "राधोऽकर्मकाद् वृद्धावेव' वृद्ध्यर्थे इव अकर्मकादेव राधेः श्यन् । अस्य तु सिद्धिद्रोहदैवपर्यालोचनादयोऽर्थाः"। धा, का व्या (स. २. श्लो ६३). राध संसिद्धौ V. प. अनो रुध कामे IV. आ. रुधिर् आवरणे VII. उ.

CC-0. In Public Domain. Digitization by eGangotri

हिंसौ वधेत् प्रतिहतौ तङि बाधतेऽथ
वृद्धाववर्धत वृधोः शपि, दीपनोक्त्योः ।
वर्धेदवर्धयत वर्धयति त्वयं चौ
पूर्तिच्छिदोश्चङवर्धत वर्धयेद् द्वौ ।। २२६ ।।

शुद्धौ शुन्धति शुन्धेत धात्वोः शपि, पुषादितः ।
शुध्यन्ति, शोधनायां तु यौ शुन्धयति शुन्धति ।। २२७ ।।

गुदरवकुत्सितरवयोर्द्युतादितः शर्धते तङाद्रत्वे ।
शर्धति शर्धेत प्रहसने पुनः शर्धयेत शर्धति चौ ।। २२८ ।।

द्वौ षाध साध सिद्धौ साध्यति साध्नोति साध्नुयात् साध्येत् ।
सिद्धौ सिध्यति गत्यां मङ्गलकृतिशास्त्रयोः सेधेत् ।। २२९ ।।

---

२२६ 'वध हतौ' क. I. प. 'वाधृङ बाधृवत्' क. २१६. 'बाधृङ विहतौ क. २१४. वृधु वृद्धौ I. आ. वृधु भाषा(सा)र्थः X. उ. वर्ध छेदनपूरणयोः X. उ.

२२७ शुन्ध शुद्धौ I. अयं परस्मैपदीति माधवादयः । 'शुन्धक् शुद्धौ शुन्धञ च (क. २२६) इति आत्मनेपद्यपि । शुध शौचे IV. प. शुन्ध शौचकर्मणि X उ. आधृषीयः ।

२२८ शृधु शब्दकुत्सायाम् I. आ. द्युतादिः । 'शब्दकुत्सा पायुरव इत्येके' प्र. शृधु उन्दने I उ. उन्दनं क्लेदनम् । शृधु प्रहसने X. उ. उदित्त्वाण्णिज्विकल्पः ।

२२९ 'षाधो न्त साध् यतौ ! सिद्धौ' क. २१८ षाधेः साधेश्च श्यनि रूपं माधवीये न दृश्यते । षिधु संराद्धौ VI. प षिध गत्याम् I. प. षिधू शास्त्रे माङ्गल्ये च I. प. शास्त्रं शासनम् ।

CC-0. In Public Domain. Digitization by eGangotri

प्राणेऽन्यते प्राणिति हिंसने श्र-
द्धायां च यौ चानयते चनेद् द्वौ ।
वधे रवे शप्यचनन्मिदाद्यो
जायेत जन्यां निगमे जजन्ति ।। २३० ।।

श्रद्धोपहत्युपकृतोरुपघातने श्र-
द्धायां च तानयति तानयते तनेद् यौ ।
दैर्घ्ये वितानयति च व्यतनद् द्वयं यौ
विस्तारणे च करणे तनुते तनोति ।। २३१ ।।

ऋजुतायां दीदांसेद् दीदांसेतावखण्डने दानेत् ।
दानेत, रवे धनतीमे शपि धान्ये धनन्ति वेदेऽसौ ।। २३२ ।।

शब्दे शपि ध्वनेदस्य वा मित्त्वाद् ध्वनयेत णौ ।
ध्वानयेताप्यथादन्ताद् ध्वनयेत ध्वनापयेत् ।। २३३ ।।

---

२३० अन प्राणने IV. आ. अन प्राणने II. प. चन श्रद्धोपहिंसनयोः X. उ. आधृषीयः । चन च (हिंसायाम्) । I. प. घटादिः । 'चन् शब्दे' क. २१९. जनी प्रादुर्भावे IV आ. जन जनने III. प छान्दसः ।

२३१ तनु श्रद्धोपकरणयोः X उ. आधृषीयः । 'तनु क्युपहतौ श्रद्धाघाने श्रद्धोपघातयोः' क. २२०. 'तनु श्रद्धोपहिंसनयोरित्येके' धा. का. व्या (३-५१). 'उपसर्गाच्च दैर्घ्ये' मा. तनु विस्तारे VIII. उ. 'अयं करणार्थेऽपि' । प्र.

२३२ दान अवखण्डने I. उ दानेरार्जवे 'मान्बध—' (३-१-६) इत्यादिना नित्यं सन् । 'दानेरार्जवे सनुक्तेरवखण्डनोक्तिर्व्यर्था' प्र. एवं च अवखण्डने केवल-धातुप्रयोगश्चिन्त्यः । 'धन् रवे' क. २२१. धन धान्ये III. प. छान्दसः ।

२३३ ध्वन शब्दे I. प. ध्वन शब्दे X. उ. अदन्तः । 'मि ध्वन' क. २२१.

CC-0. In Public Domain. Digitization by eGangotri

शप्यर्चामदयोर्मनत्यवगमे मन्वीत मन्येत त–
ङ्येतावौ श्यनि चाथ पूजितविचारे पूजनार्चयोः ।
मीमांसेत सनेव मानयति मानेन्मानयेतेत्यमी
यौ स्युः पूजविधावमानयत चौ स्तम्भे तङेवास्य हि ॥ २३४ ॥

द्वाभ्यां सेवनशब्दयोर्वनति शप्येतौ तनादौ पुन–
र्याच्ञायां वनुते वनोत्यथ करोत्यर्थेऽप्यनुक्तौ वनेत् ।
प्रादौ नित्यमितोऽस्य णौ प्रवनयेदन्यत्र वा स्यादथो
यौ द्वौ वानयते वनेदिति वने(:)श्रद्धोपहत्यादिषु ॥ २३५ ॥

औ दाने सनुते सनोति, शपि सेवायां सनेन्निस्वने
न्निभ्यः स्यात् स्तनतीति मित्त्वमिह वा सिद्ध्येदुपान्त्यान्त्ययोः ।
दन्त्याद्योऽन्त्यगतोऽस्तनापयदयं मेघस्वनेऽथ स्वने–
ऽदन्तस्य स्वनयेच्छपि स्वनपरिष्कृत्योः स्वनेद्वा मितः ॥ २३६ ॥

---

२३४ 'मान् ङ विचारे, मान् कि चार्चे, मन् च, मन् ङक् च गर्वके' क. २२२. 'मन पूजागर्वयोः मनति' प्र. क. मनु अवबोधने VIII. आ. मन ज्ञाने IV आ. एतौ औ इति छेदः । औ उप्रत्यये तनादौ इत्यर्थः । मान पूजायां I. आ. नित्यसनन्तः । तथात्वे जिज्ञासार्थः । मिमांसा विचारणा । मान पूजायाम् X. उ. आधृषीयः । मान स्तम्भे X. आ. आकुस्मीयः ।

२३५ वन संभक्तौ I. प. वन शब्दे I. प. वनु याचने VIII. आ. छान्दसः । वनु क्रियासामान्यार्थे । 'ग्लास्नावनुवमां च' (ग. सू.) इति अनुपसर्गादिषां वा मित्त्वम् । उपसर्गान्नित्यम्।'वन्कि तन्किवत्' क. २२३. 'वन श्रद्धोपघातोपघातोपकार–श्रद्धासु' प्र. क.

२३६ षणु दाने VIII. उ. षण संभक्तौ I. प. ष्टन शब्दे I. प. स्तन शब्दे I. प. स्तन देवशब्दे X. उ. ष्वन्यन्ताः ष्टम्यन्ता घटादय इति मतद्वयं माधवोक्तम् । फणेः पूर्वं घटादय इत्येके इति क्षीरस्वामी । फणेः परस्य स्तनेः क्षीरस्वामिमतेन वा मित्त्वम् । स्वन शब्दे I. प. फणादिः । स्वन अवतंसने I. प. घटादिः फणादिश्च । स्वनण् च (शब्दे), ण् स्वन् मि तंसने क. २२४.

CC-0. In Public Domain. Digitization by eGangotri

स्यादाप्लृ लम्भनायां यावापयत्यापतीत्युभौ ।
व्याप्तावाप्नोति यावन्त्योक्तोऽसावप्यनिटौ मतौ ।। २३७ ।।

चौ क्षान्तावक्षम्पत् क्षम्पयति प्रेरणप्रणाशनयोः ।
क्षपयेदन्त्राद्यार्थे क्षिप्येच्छ्यनि शे क्षिपेत् क्षिपते ।। २३८ ।।

कुपिर् कोपे कुप्यतीति दीपनोक्त्योरकोपयत् ।
चौ कुपि (स्म?स्त) रणेऽस्य स्यान्नुमि कुम्पति कुम्पयेत् ।। २३९ ।।

योग्यत्वशक्त्योः शपि कल्पतेऽथ चौ
स्यान्मिश्रणायामपि कल्पयेत यौ ।
उक्तलये च स्मरणे च कल्पति
स्याद् दुर्बलत्वे (कथ?कृप)येत् कथादितः ।। २४० ।।

---

२३७ आप्लृ लम्भने X. उ. आधृषीयः । आप्लृ व्याप्तौ V. प. यौ युजादौ । अन्त्योक्तः आपतीत्युक्तः । 'तपिं तिपं'- इत्यादि कारिकापाठादनिट्त्वम् । मा. ।

२३८ क्षपि क्षान्त्याम् X उ. क्षप प्रेरणे X. उ. 'नाशनार्थोऽप्ययम्' धा. का. व्या. (३-६४) क्षिप प्रेरणे VI. उ.

२३९ कुप क्रोधे IV. प. 'कुप् य इर्' (क. २२५) इति द्रुमे इरित्वेन पाठः कुप भाषा(सा)र्थः X. उ. कुपि छादने X. उ. क्षी. कुबि इति माधवः ।

२४० कृपू सामर्थ्ये I. आ. 'सामर्थ्यं शक्तिर्योग्यता च' प्र. 'कृप मिश्रणचिन्तासामर्थ्येषु' X. उ. (विकल्पितणिच्) प्र. क. कृप दौर्बल्ये X. उ. कथादिः ।

CC-0. In Public Domain. Digitization by eGangotri

त्राणे गोपायति निन्दने जुगुप्सेत (निन्दने? गोपने) गोपेत ।
व्याकुलतायामिरितो गुप्यति चौ दोपनोक्तयोर्गोपयति ।। २४१ ।।

शपि सान्त्वने चपति चौ दम्भे शाठ्ये च कत्थने चपयेत् ।
वा मित्त्वात् चापयते चपि गमने चम्पयेच्चम्पेत् ।। २४२ ।।

क्षेपे टिपिरष्टिप्यति टिपेष्टिपेट्टेपयेत् क्रमाच्छे चौ । (?)
डप सङ्घाते तङ वा डापयते डम्पयेच्च डम्पति चौ ।। २४३ ।।

---

२४१ गुपू रक्षणे I. प. गुप गोपने I. आ. 'निन्दायां सन् । अन्यत्र यथाप्राप्तं प्रत्ययाः स्युः इति काशिकावृत्तौ (३-१-५). गुप व्याकुलत्वे IV. प. पुपादिः । 'गुप् म इर् व्याकुलत्वे' क. २२७. गुप भाषा(सा)र्थः । X. उ.

२४२ चप सान्त्वने I. प. चह परिकल्कने चुरादिः । आद्यः कथादिः । चप इति मैत्रेयः । 'परिकल्कनं दम्भः शाठ्यं वा' । धा. का. व्या (१.९१) कत्थनार्थो मृग्यः । चुरादौ 'चप' ज्ञपादित्वान्मित् । 'चपक्म कल्के' क. २२८. 'चपक्मि' इत्यपि पाठः । एतदनुसृत्य 'वा मित्त्वात्' इत्युक्तम् । चपि गत्याम् X. उ.

२४३ टिप क्षेपे X. प. प्र. क. 'टिपक् तुदि' क. २२९. टिप्यति टिपेत् इति श्यनि शे च टिपधातुर्मृग्यः । डप सङ्घाते X. आ. आकुस्मीयः । 'डिपि डिप् डप् डपि क् ङ ञ संहतौ' क. २२९ इति जिन्नोक्तेः तङ वा । 'डपि डिपि, दन्प दिन्प सङ्घाते' । प्र. क.

CC-0. In Public Domain. Digitization by eGangotri

क्षेपे डिप्यति डिपति पुषादिकुटाद्यो: क्रमेण डेपयति ।
सङ्घे तङि डेपयते डिम्पति डिम्पयति चौ चतुष्कमिदम् ।। २४४ ।।

शपि सन्तापे तपतीत्यैश्वर्ये तपति तप्यते वा श्यन् ।
दाहेऽतापत तपेदथ यावतपत् तापयेदिहान्त्यः सेट् ।। २४५ ।।

ऋदितोस्तिपितेप्यो: स्यात् क्षरणे तेपते तङि ।
अन्तिमः कम्पनेऽपि स्यादादिमोऽसौ विकल्पितेट् ।। २४६ ।।

चावर्दनेऽतुतुम्पत् तुम्पति शे हिंसने तुपेत् तुम्पेत् ।
तोपति तुम्पेत् त्रोपेत् त्रुम्पति शप्येव चत्वारः ।। २४७ ।।

---

२४४ डिप क्षेपे IV. प. पुषादिः । डिप क्षेपे VI. प. कुटादिः । चतुष्कम्- डिपि डिप् डप् डपि इति द्रुमोक्ता धातवः ।

२४५ तप सन्तापे I. प. अनिट् । तप ऐश्वर्ये वा IV. आ. अनिट् । 'श्यनभावे न्याय्यविकरणः परस्मैपदी च । तपति इति' इति माधवः । तप सन्तापे X. उ. सेट् । आधृषीयः ।

२४६ तिपृ क्षरणे I. आ. अनिट् । तेपृ कम्पने (क्षरणे) च I. आ. सेट् । तिपृ धातुः क्षीरस्वामिमते सेडिति पक्षद्वयमङ्गीकृत्य 'वेट्' इत्युक्तम् । तथा च कल्पद्रुमे–तिप ऊ ऋङ' (२३०).

२४७ 'तुबि अर्दने X. प. तुपीति दौर्गाः' क्षी. 'तुपिक् त्वर्दने' क. २३२. तुपिर्माधवीये नास्ति । तुन्प हिंसायाम् VI. प. तुप हिंसने VI. प. तुप् पश क्लिशि वधे' क. २३२. २३३. इति मुचादौ कल्पद्रुमोक्तेः । तुन्प हिंसायाम् I. प. तुप हिंसायाम् I. प.

CC-0. In Public Domain. Digitization by eGangotri

तृप्तिप्रीणनयोः पौषादिकात् तृप्यति, तृप्नुयात् ।
श्नौ, शे तृपेत्, प्रदीप्तौ च यौ तर्पयति तर्पति ।। २४८ ।।

हर्षमोचनगर्वेषु दृप्यति श्यन्यसावि(र? रित्) ।
उत्क्लेशे शे दृपेद्, दीप्तौ यौ दर्पयति दर्पति ।। २४९ ।।

क्षरणे(धे? दे)पते द्वाभ्यां तङि, सन्तापने पुनः ।
धूपायत्यायतो दीपनोक्तयोश्चावधूपयत् ।। २५० ।।

इरितो मोहने लुप्येच्छेदे लुम्पति लुम्पते ।
कम्पने शपि वेपेत क्षेपे चौ वेपयेदिति ।। २५१ ।।

---

२४८ तृप प्रीणने IV. प. प्रीणनं तृप्तिस्तर्पणं च । पुषादिः । तृप प्रीणने VI. प. तृप प्रीणने संदीपने च X. उ. आधृषीयः ।

२४९ दृप हर्षमोहनयोः IV. प. पुषादिः । दृपधातुः 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यः' इत्यनेन विकल्पिताङः । तत इरित्त्वफलः । तथा च कल्पद्रुमे 'ञि दृप् यू इर् हर्षगर्वयोः' (२३२) तत उक्तं 'असाविरित्' इति । मोहनं गर्वः । 'मोचनयोरित्येके' धा. का. व्या. २. ६४. दृप उत्क्लेशे VI. प. दृप सन्दीपने X. उ. आधृषीयः ।

२५० तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः I. आ. अत्र माधवीयधातुवृत्तौ - दिपृ देपृ इति काश्यपः इत्युक्तम् । तयोरुदाहरणमिदम् । धूप सन्तापे I. प. आयतः 'गुपू—' (१-३-२८) इत्यायप्रत्ययात् । धूप भाषा(सा)र्थः X. उ.

२५१ लुप विमोहने IV. प. पुषादिः काव्यादिश्च । 'इर् लुप् य युपि' क. २३५. इतीरित्त्वं चोक्तम् । लुप्लृ छेदने VI. उ. मुचादिः । टुवेपृ कम्पने I. आ. 'विप् क क्षेपे' क. २३५ ।

CC-0. In Public Domain. Digitization by eGangotri

शप आक्रोशे शपते शपति शपि श्यन्यशप्यताशप्यत् ।
षप सप सम्यग्ज्ञाने सम्बन्धे च द्वयस्य सपति शपि ।। २५२ ।।

स्यातां शपि ष्टिपृ ष्टेपृ क्षरणे स्तेपते तङि ।
स्तेप क्षेपण इत्यस्य स्तेपयेत् स्तेपयेत चौ ।। २५३ ।।

द्वौ ष्टूपिर् स्तूपिरुच्छ्राये दिवादौ स्तूप्यति द्वयोः ।
चौ द्वावनिदितावेतौ स्तूपयेत द्वयोः पदम् ।। २५४ ।।

हिंसादानश्लाघानिन्दायुद्धेष्वृफेदिहाद्यार्थे ।
नोपधयाऽनुमि भवेदृम्फेद् ग्रन्थे गुफेद् गुम्भेत् ।। २५५ ।।

तु(म्प?फ)तुम्फ वधे शे द्वावतुफन्नुमि तुम्फति ।
तोपेत् तुम्पेत् तथा त्रोफेत् त्रुम्फेदित्यपि शप्यमी ।। २५६ ।।

---

२५२ शप आक्रोशे I. उ. शप आक्रोशे IV. उ. षप समवाये I. प. 'समवायः सम्बन्धः सम्यगवबोधो वा' प्र. सप न दृष्टः ।

२५३ ष्टिपृ ष्टेपृ क्षरणे I. आ. 'स्तेप क क्षेपे' क. २३६ अयमन्यत्र न दृष्टः ।

२५४ 'ष्टूप् कोच्छ्राये' क. २३७. 'स्तूप समुच्छ्राये IV. क्षी. ष्टूप् य इर् च' क. २३७. ष्टूप समुच्छ्राये X. उ. स्तूप समुच्छ्राये X. उ. स्तुपेति क्षीरस्वामी ।

२५५ 'ऋफश् दानश्लाघनिन्दाहिंसाजौ' क. २३८. ऋन्फ हिंसायाम् VI. प. गुफ गुन्फ ग्रन्थे VI. प.

२५६ तुफ तुन्फ हिंसायाम् VI. प. नुमीति चिन्त्यम् । तुप, तुम्प, हिंसायाम् I. प. त्रुफ त्रुम्फ हिंसायाम् I. प.

CC-0. In Public Domain. Digitization by eGangotri

तृप्तिप्रीणनयोस्तृ(म्फि?म्फ)तृ(प्त्यो?फो)स्तृम्फेत् तृफेद् द्वयोः ।
उत्क्लेशार्थे दृफेर्दृम्फेः क्रमाद् दृफति दृम्फति ॥ २५७ ॥

हिंसागत्यो रफेद् रम्फेच्छप्याद्यार्थे मुचादितः ।
रिम्फेत् कथनविश्राणनिन्दायुद्धेषु चारिफत् ॥ २५८ ॥

शब्देऽ(बे?म्बे)त गतावम्बेत् कम्वेदथ कबेत कबरत्वे ।
छादे कुम्बेदेते शपि कुम्बेत् कुम्बयेद् द्वौ चौ ॥ २५९ ॥

शपि चुम्बे चुम्बति चौ हिंसायामस्य चुम्बयेच्चुम्बेत् ।
शप्यर्दे(चु?तु)म्बति चावदर्शनेऽप्यस्ति तुम्बयेत् तुम्बेत् ॥ २६० ॥

---

२५७ 'तृप तृम्फ तृप्तौ VI. प. आद्यः तृफ इत्येके । प्रीणने द्रुमे' । प्र. दृफ दृम्फ उत्क्लेशे VI. प.

२५८ रफ रफि गत्याम् I. प. 'रिफ पश् वधे । रफि रफ् वर्फ गत्यां च' क. २३८ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु VI. प. रिफधातुः कल्पद्रुममते मुचादिः । नान्यत्र । अतः अरिफत् इति ।

२५९ अबि शब्दे I. आ. अन्ब गतौ I. प. वर्फ रफ इत्यादौ क्षीरस्वामी 'अर्बेत्यादौ रेफस्थाने नकारं कौशिको मन्यते' इति । एवमेव कर्ब इत्यस्य कन्ब इति पाठः । कबृ वर्णे I. आ. कुबि आच्छादने I. प. कुबि आच्छादने X. उ.

२६० चुबि वक्त्रसंयोगे I. प. चुबि हिंसायाम् X. उ. तुबि अर्दने I. प. तुबि अदर्शने अर्दने च X. उ.

CC-0. In Public Domain. Digitization by eGangotri

शब्दे रम्बेताथ गत्यामरम्ब–

ल्लम्बेत् स्रंसध्वानयोर्लम्बते तङ ।

अर्दे लुम्बेच्छप्यथादर्शने च

स्यातां लुम्बेल्लुम्बयेदित्युभौ चौ ।। २६१

शपि गत्यां शम्बति स्यात् सम्बन्धे शम्बयेत चौ ।

षर्ब सर्ब गतौ शप्येवोभाभ्यामपि सर्बति ।। २६२ ।।

षम्ब सम्ब गतौ द्वौ शप्युभाभ्यामपि सम्बति ।

सम्बन्धार्थे द्वयोः स्यातां सम्बयेत् स(ा)म्बयेत चौ ।। २६३ ।।

पूर्तावुम्भत्युभति च सञ्चलने क्षोभते द्युतादिगतात् ।

क्षुभ्येत् पौषादिकतः क्षुभ्नाति क्र्यादितः सिध्येत् ।। २६४ ।।

---

२६१ रबि शब्दे I. आ. 'रबि गत्याम् I. प. क. २४२. लबि शब्दे अवस्रंसने च I. आ. लुबि अदर्शने I. प. 'लुब्यर्दने' क. २४२. लुबि तुबि अदर्शने X. उ. 'अर्दन इति केचित्' धा का. व्या. ३.२९.

२६२ शर्ब गतौ I. प. शम्ब इति कौशिकः । साम्ब सम्बन्धे X. उ. 'शम्ब इति चन्द्रः' क्षी. 'शम्ब चेति मैत्रेयः' मा षर्ब गतौ I. प. सर्ब गतौ I. प.

२६३ षम्ब सम्ब इति षर्ब सर्ब इत्यनयोः कौशिकीयः पाठ इति क्षीरस्वामी । 'साम्ब सम्ब क, संबन्धे' क. ३४३.

२६४ उभ पूरणे VI. प. उम्भ पूरणे VI. प. क्षुभ सञ्चलने I. आ. द्युतादिः । क्षुभ सञ्चलने IV. प. पुषादिः । क्षुभ सञ्चलने IX. प.

CC-0. In Public Domain. Digitization by eGangotri

हिंस्यां जभ्येन्नाशने जम्भयेज्ज-
म्भेच्चौ द्वाभ्यां याभहिंस्योरजम्भत् ।
हिंसार्थे धातुत्रय (ज्जृ?ज्ज)म्भते (जृ?ज)-
म्भेतैवं जम्भेत शप्येव सप्त ।। २६५ ।।

नभते द्यौतादिकतः पुषादितो नभ्यति श्नि नभ्नाति ।
ए(व)मतोभत तुभ्येत् तुभ्नात्येते वधार्थे षट् ।। २६६ ।।

क्षेपे दम्भेद् दम्भयेद् दा(म्भ?भ)येत् स्यु-
श्चौ सङ्घाते दम्भयेतेति तङ्वान् ।
दम्भेऽदभ्नोत् क्षेपणे दिम्भयेद् दि-
म्भेच्चौ सङ्घे तङ्वतो दिम्भयेत ।। २६७ ।।

---

२६५ 'जभ वधे' IV. प. प्र. क. नायं मुद्रिते द्रुमे । जभि नाशने X. उ. 'जभि जभ् यभने' क. २४५. 'जभि वधे' I. प प्र क. अयं मुद्रिते द्रुमे नास्ति । 'जम्भ वधे च द्रुमभाक् शपि' इति प्रकियासर्वस्वे जभ जृभि गात्रविनामे इत्यत्र । 'जभिक् नशि । जभि जभ् यश्नने, जभ् ङ जृम्भे, जभ जृञिङ च, ङी । जृभ् च' क. २४८, २४५. मुद्रितपाठः ।

२६६ णभ हिंसायाम् I. आ.द्युतादिः । णभ हिंसायाम् IV. प. पुषादिः । णभ हिंसायाम् IX. प. तुभ I. आ. द्युतादिः । तुभ हिंसायाम् IV. प. पुषादिः । तुभ हिंसायाम् IX. प.

२६७ 'दन्भुन् दम्भे, दम्भ दिम्भ-ङ सङ्घाते,ऽथ दिभ् दभि । दभक् नोदे' क. २४६, २४७. 'दभ दभि दिभि प्रेरणे X उ. दाभयति दम्भयति, दम्भति दिम्भयति दिम्भति' प्र. क. एषु दम्भु V. प. धातुरेव माधवीयादौ दृष्टः ।

CC-0. In Public Domain. Digitization by eGangotri

यौ भीसन्दर्भयोर्द्वाभ्यां पृथग् दर्भति दर्भयेत् ।
ग्रन्थे दृभेर्दृभेद् दर्भ हिंसायां शपि दर्भति ।। २६८ ।।

राभस्ये शप्यभरत रवे रम्भते लम्भते द्वौ
लाभे तङ्वानलभत पुनः प्रेरणार्थे कथा(द्यो:?दे:)।
धा(त्वो?तो)र्लभापयति लभयेद् द्वौ लुभिर्गार्ध्य इत्य-
स्माल्लुभ्येदित्यथ लुभति शे व्याकुलीभावनायाम् ।। २६९ ।।

दीप्तौ शुम्भेदशुभद् द्वौ शे द्यौतादिकस्य शोभेत ।
शपि दीप्त्युक्तिवधेषु स्यातां शोभेदशुम्भद् द्वौ ।। २७० ।।

वधे सेभति सिम्भेत् षुन्भ सुन्भा(वृति?वुक्ति)हिंसयोः ।
द्वाभ्यां सुम्भति शप्येते मूर्धन्यादेः सुभेदिति ।। २७१ ।।

---

२६८ दृभी भये X. उ. आधृषीयः । दृभ सन्दर्भे X. प. आधृषीयः । दृभी ग्रन्थे VI प. 'दर्भ हिंसायाम् I. प. प्र. क. 'भर्भ हिंसे' क. २४७. इति मुद्रिते ।

२६९ रभ राभस्ये I. आ. रभि शब्दे I. आ 'लभिङ शब्दे' क. २४८. डुलभष् प्राप्तौ I. आ. 'लभ प्रेरणे लभयति' प्र. क. अयमदन्तः । लुभ गार्ध्ये IV. प. पुषादिः । लुभ विमोहने VI प. तच्च व्याकुलीकरणम् ।

२७० शुभ शुन्भ शोभार्थे VI. प. 'शुभ्लृङ दीप्तौ शुभप् शुन्भ् श पुन्भ् च षिन्भु च हिंसने' क. २४९. 'शुभ शुन्भ भाषणे I. प. हिंसायां च । 'भासन इत्येके' । धा. का. व्या. १.५६. माधवोऽप्येवम् ।

२७१ षिभु षिम्भु हिंसायाम् I. प. षृभु षृम्भु इत्यत्र माधवः - अत्र मैत्रेय एवं पठित्वा षिभु षिम्भु इत्येके इति । षुन्भ सुन्भ भाषणे हिंसायां च I. प. 'शुभ शुन्भ भाषणे हिंसायां च । भासन इत्येके । पुन्भ इत्यन्ये । आद्यौ शोभार्थौ शे । शुभिर्द्युतादौ च । अन्त्यो दन्त्यादिर्द्रुमशपि । मूर्धन्यादिर्द्रुमशे' प्र. (भूवादौ) । 'सृन्भ सृभ स्रिभु । हिंसे, सुम्भ द्युतौ च' क. २५०.

CC-0. In Public Domain. Digitization by eGangotri

षृभु षृन्भु वधे तद्वत् सृभु सृन्भु वधे शपि ।
द्वयोः सर्भेद् द्वयोः सृम्भेत् सषयोः फलमूह्यताम् ।। २७२ ।।

द्वाभ्यां स्तम्भे स्तम्भते नोपधोऽनिट्
स्तभ्नाति स्तभ्नोत्युभौ रोधनेऽपि ।
स्तुभ्नाति स्तुभ्नोति निष्कोषणेऽपि
द्वौ, स्तोभे स्तोभेत शप्यादिमौ च ।। २७३ ।।

प्रतिबन्धरोधयोः स्कभ्नाति स्कभ्नोत्युभौ शपि स्तभ्भे ।
अस्कम्भत प्रमादे विस्रम्भे स्रम्भते द्युताद्योऽन्तः ।। २७४ ।।

---

२७२ षृभु षृम्भु हिंसार्थौ I. प. 'सृभु सृम्भु इत्यषोपदेशावेके' प्र. सिषर्भयिषति सिसर्भयिषतीति रूपद्वयलाभः फलम् ।

२७३, २७४ 'ष्टभिङ स्तभिङ स्तम्भे' क. २४९. ष्टभि प्रतिबन्धे I. आ. दन्त्यादिर्द्रुमादन्यत्र न । स्तम्भु स्तम्भनार्थः सौत्रो धातुः श्नायां श्नौ च । उदित्त्वाद् 'यस्य विभाषे'त्यनिट्त्वम् । 'स्तन्भादयश्चत्वारः सौत्राः । सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ (स्तन्भु स्कन्भु) स्तम्भार्थौ द्वितीयो (स्तुन्भु) निष्कोषणार्थः चतुर्थो (स्कुन्भु) धारणार्थ इत्याह । सर्वे परस्मैपदिनः । 'क्र्यादौ सिद्धान्तकौमुदी । ष्टुभु स्तोभे I. आ. 'ष्टु (भ?भु) स्तम्भे स्तोभते भीत्या । अयं व्यापारे प्रसिद्धः । स्तोभते पाके । सौत्रश्चायम्' । प्र. 'ष्टुभुङ ष्टभिङ स्तमिङ स्तम्भे' क. २४९.

स्कभि प्रतिबन्धे I. आ. अस्य प्रमादोऽर्थो न दृश्यते । अस्रम्भत प्रमादे इति पाठः स्यात् । तदात्वे श्रम्भु प्रमादे I. आ. अत्र माधवः- 'दन्त्यादिरिति चन्द्रः । सर्वस्वे तु–श्रम्भु पाके । स्रन्भु इत्येके इति भ्वादौ । 'स्रन्भु हर्षे ' प्र. क. 'स्रन्भु ङ स्मृतः प्रमादे, लृ स्रन्भु ङ विश्वासे' इति मुद्रिते । स्रन्भु विश्वासे I. आ. द्युतादिः ।

CC-0. In Public Domain. Digitization by eGangotri

रोगे चावामयते रवसेवागतिषु चामतीति शपि ।
क्षान्तौ षितः क्षमेत क्षाम्येच्छ्यन्यषिदिरिच्चासौ ।। २७५ ।।

भक्षणे छान्दसाच्चम्नोति श्नावथ चमेच्छपि ।
आर्द्रत्वे तिम तीमेति द्वौ तिम्येत् तीम्यति श्यनि ।। २७६ ।।

कोपे भामेत शपि स्याद् भामयते कथादितश्चलने ।
भ्रमति भ्राम्यति वा श्यन्यनवस्थाने भ्रमेत् भ्राम्येत् ।। २७७ ।।

चौ वेष्टने यमयतेऽथ भोजनायां घटादितश्चैवम् ।
व्यापारादौ त्वायामयत्यथो यच्छति प्रशमनायाम् ।। २७८ ।।

---

२७५ अम रोगे X. उ. अम गत्यादिषु I. प. 'शब्दसंभक्त्योरादिशब्देन ग्रहः' मा. क्षमूष् सहने I. आ. क्षमू सहने IV. प. 'क्षमू । इर् भ्य मर्षे' क. २५१, २५२. अतः इरिदित्युक्तिः । अक्षमत्, अक्षमित् इत्यङविकल्पः इरित्वफलम् । पुषादित्वान्नित्याङिति माधवपक्षे अक्षमदित्येव ।

२७६ चमु भक्षणे V. प. चमु अदने I. प तिम तीम आर्द्रीभावे IV. प.

२७७ भाम क्रोधे I. आ. भाम क्रोधे X. उ. भ्रमु अनवस्थाने IV. प. भ्रमु चलने I. प. 'वा भ्राश'- (३-१-७०) इति पक्षे श्यन्। तदभावे शप् ।

२७८ यम परिवेषणे X. उ. तच्च 'परिवेष्टन'मिति माधवः । 'यम च परिवेषणे । तच्चात्र वेष्टनम् । चान्मिदित्यनुषङ्गः । पटं यमयति' प्र. 'यमोऽपरिवेषणे' इति परिवेषणे मित् । परिवेषणं भोजनम् । परिवेषणे यमयति ब्राह्मणान्' । प्र. 'अयं परिवेषणादन्यत्र अमन्तोऽपि न मित्' मा. घटादिरयम् । यम उपरमे I. प. 'इषुगमियमा'मिति छः ।

CC-0. In Public Domain. Digitization by eGangotri

आलोचने चौ तङि शामयेत

शान्तावशाम्यत्, तपसि प्रखेदे ।

श्राम्यत्यमू द्वाविदितौ श्यनुक्तौ

निमन्त्रणे श्रामयते कथादौ ।। २७९ ।।

अविक्लवत्वे समतीति शप्यद-

न्ताद् विक्लवत्वे समयेत; सान्त्वने ।

समापयेदित्यथ चावसामयत्

सम्येत् पुषादेः परिणामवाचिनः ।। २८० ।।

वितर्के स्यामयेतेति चौ तङ्वान् शशपोः स्वने ।

स्यमति द्वौ फणादी च कथादौ तु स्यमापयेत् ।। २८१ ।।

---

२७९ शम आलोचने X आ. आकुस्मीयः । शमु उपशमे IV. प. श्रमु तपसि खेदे च IV. प. शमादिः । शमु भिर् य शमे शम् ङ कः आलोचे, श्रमु भ्यजि इर् तपःखेदयोः' क. २५५ श्राम निमन्त्रणे श्रामयति' । प्र. क. अयमदन्तश्च । मुद्रिते द्रुमे न दृश्यते ।

२८० षम ष्टम अवैक्लव्ये समति स्तमति धीरः । अविक्लवो भवतीत्यर्थः । आद्यो द्रुमकथादौ च । दन्त्यादिः परिणामे पुषादौ' । प्र. भ्वादौ । 'षम ष्टम । वैक्लव्येऽथ क्साम सान्त्वे ' क. २२६. वैक्लव्ये इति माधवः ।

२८१ स्यम वितर्के X. आ. आकुस्मीयः । स्यमु शब्दे I. प. 'स्यमुण् श ध्वनने (क २५६.) इति द्रुमे शविकरणोऽपि । 'स्यम शब्दे X. उ. प्र. क. (अदन्तः) ।

CC-0. In Public Domain. Digitization by eGangotri

सङ्ग्रामयते सङ्ग्रामयेत सङ्ग्रामयेत् त्रयं युद्धे ।
कथादिकादिहामन्त्रणे समि ग्रामधातुतोऽप्यन्त्यौ ॥ २८२ ॥

गत्यामयेदयेताप्ययतेऽथ च(ा)येत दर्शनार्चनयोः ।
चायति चायेता,वनगत्योर्नयते गतौ नयेत शपि ॥ २८३ ॥

शपि सन्तानावनयोस्तायेत, गतौ तयेत दाने स्तः ।
दायति दायेतावनगत्यादानहननेऽपि तङि दयते ॥ २८४ ॥

क्षये चौ व्याययेद् वित्तत्यागेऽदन्ताद् व्ययापयेत् ।
शपि व्ययेत तङयेव गतां तु व्ययते व्ययेत् ॥ २८५ ॥

ईर्ष्यायामीर्ष्यानादरयोरपि सूर्ज्य (क्ष्य)ति द्वयोर्धात्वोः ।
तद्वत् सूक्ष्यंति च द्वितयेऽन्त्यो दन्त्यादिरत्र शपि सर्वे ॥ २८६ ॥

---

२८२ सङ्ग्राम युद्धे X. आ. सङ्ग्रामशब्दात् 'तत्करोति'- इति णिचि उभयपदित्वम् । ग्राम आमन्त्रणे X. उ.

२८३ 'अय गतौ I. उ. प्र. क. 'अयञ् गतौ' क. २५७. अय गतौ I. आ. चायृ पूजानिशामनयोः I उ 'णय तय रक्षणे चेत्यन्ये' I. प. प्र. चाद् गतौ ।

२८४ तायृ सन्तानपालनयोः I. आ. तय गतौ I. आ. 'दायृ दाने । दायति दायते' प्र. क. 'दायृञ् दाने' क. २५९. दय दानगतिरक्षणहिंसादानेषु I. आ. मूलेऽपिना दानपरिग्रहः ।

२८५ 'व्यय क्षये' X. प. क्षी. व्यय वित्तसमुत्सर्गे X. उ. अदन्तः । व्यय वित्तत्यागे I. आ. व्यय गतौ I. उ. 'व्ययक् नुदि' (क. २६२) इति प्रेरणायामपि ।

२८६ 'षूर्ज्यं ईर्ष्यायाम् । सूर्ज्यति । सूर्क्ष्य सूर्ज्य अनादरे च। सूर्क्ष्यति सूर्ज्यति' प्र. क.

CC-0. In Public Domain. Digitization by eGangotri

गत्यामीर्ते क्षेपे यावीरयतीरतीत्यथेर्ष्यायाम् ।
सन्मार्गावस्थानेऽपीर्येदीर्येत कण्ड्वादेः ॥ २८७ ॥

कौटिल्ये कोरति शपि, शब्दे कुरति, च्छिदाविलेखनयोः ।
खनने च खुरति शेऽथो शपि गमनप्रतिहतौ भवेत् खोरेत् ॥ २८८ ॥

कौटादिकादुद्धरणे गुरते गूरयेत चौ ।
गतिहिंसनयोर्गूर्येतेत्येतत् त्रितयं तङि ॥ २८९ ॥

भीमत्वशब्दयोः शे स्यादघुरच्छपि घोरते ।
घूरी हिंसावयोहान्योः श्यनि तङ्वानघूर्यत ॥ २९० ॥

---

२८७ ईर गतौ कम्पने च. II. आ. ईर क्षेपे X. उ. 'इरज् ईर्ष्यायां मार्गावस्थाने च । अकार उक्त्यर्थः । 'हलि च' इति दीर्घः । ईर्यति ईर्यते । ईर्ष्यति सन्मार्गे तिष्ठति वेत्यर्थः' - प्र. सुब्धातुषु कण्ड्वादौ । ईर्ष्यायामेव सि. कौमुद्याम् ।

२८८ 'कुर कौटिल्ये' I. प. प्र. क. 'क्मर् कौटिल्ये' इति मुद्रिते द्रुमे २६२. कुर शब्दे VI. प. 'खुर् श क्षोरच्छिदोः' क. २६३. 'क्षुरश् । विलेखे खनने' (क. २६३) इति विलेखनखनने क्षोरशब्दार्थः ।) 'खुर छेदने' मा. 'खुर विलेखने । विलेखनं छेदः' क्षी. खननार्थः द्रुमेऽधिकतया । खेरृ गतिप्रतिघाते I. प.

२८९ गुरी उद्यमने VI आ. कुटादिः । गुर उद्यमने X. आ. आकुस्मीयः । गुरी हिंसागत्योः IV. आ.

२९० घुर भीमशब्दार्थयोः VI. प. 'तेऽघोरिषुर्महाघोरम्' इत्यत्र घुरिस्तुदादिरुदात्तेदिति शङ्करेणोक्तेः शप्यन्यत्र वा तङ्वान् घुरिरुह्यः' तुदादौ प्र. घुरी हिंसावयोहान्योः IV. आ.

CC-0. In Public Domain. Digitization by eGangotri

गत्यदनयोश्चरति, चौ चर संशयने विचारये,च्चौर्ये ।
शपि चोरति चौ चोरयति श्यनि दाहेऽस्ति चूर्येत ।। २९१ ।।

त्वरणे तुतोर्ति वेदे त्वरणगतित्वरणहिंसने तूर्येत ।
अग्रगतावपुरच्छ्यनि पूर्तौ पूर्येत पूरयेत् पूरति चौ ।। २९२ ।।

विक्रमणेऽदन्ताभ्यां वीरयतेऽत्वैकतस्तङेव स्यात् ।
एवं शूरयते च स्तम्भनवधयोस्तु शूर्येत ।। २९३ ।।

षूरी हिंसास्तम्भनयोः श्यनि तङ्वानसूर्येत ।
ऐश्वर्यदीप्त्योर्मूर्धन्यदन्त्यादिभ्यां सुरेदिति ।। २९४ ।।

पर्याप्तिवारणालङ्क्रियास्वलेदलति चालतेऽन्त्याद् द्वौ ।
शे स्वप्नक्षेपणयोरैलच्चावेलयेदिहान्त्यार्थे ।। २९५ ।।

---

२९१ चर गतिभक्षणयोः I. प. चर संशये X. उ. 'चुर् कि स्तेये' क. २६५. 'केचित् सर्वचुरादीनामनित्यण्यन्ततां जगुः' (चुरादौ) प्र. चूरी दाहे IV. आ.

२९२ तुर त्वरणे III. प. (छान्दसः)। तूरी गतित्वरणहिंसनयोः IV. आ. पुर अग्रगमने VI. प. पूरी आप्यायने IV. आ. 'आप्यायनं वृद्धिः' क्षी. 'ग्रासार्थे चायम्' प्र. पूरी आप्यायने X उ. ईदित्वाण्णिज्विकल्पः ।

२९३ वीर शूर विक्रान्तौ X. आ. आगर्वीयः। शूरी हिंसास्तम्भनयोः VI. आ.

२९४ 'षूरी हिंसास्तम्भनयोः' VI आ. प्र. क, 'शूर् षूर् ञ्यी स्तम्भे हिंसे' क. २६९. षुर ऐश्वर्यदीप्त्योः VI. प. 'षुर् सुर् श भैश्ययोः' क. २६९. सुर् द्रुम एव ।

२९५ अल भूषणपर्याप्तिवारणेषु I. प. अत्र मैत्रेयः- 'अकारमनुनासिकस्वरितमिच्छन्ति' मा. एवं अल, अलँ इति धात्वोरन्त्यस्य द्वौ उभयपदादेशौ। इल स्वप्नक्षपणयोः VI. प. 'प्रेरणयोः' प्र. इल प्रेरणे X. उ.

CC-0. In Public Domain. Digitization by eGangotri

संख्यानशब्दयोः शपि कलते चौ क्षेपणे तु कालयते ।
उपदेशे कालयतेऽद(न्त्या ? न्ता)द् गतिसंख्ययोः कलापयते ।। २९६ ।।

चलने चयने च स्यात् क्षलतीति ज्वलादितः ।
चौ शौचकर्मणि क्षालयेत क्षालयतीत्युभौ ।। २९७ ।।

प्रेरणे केलयेच्चौ शे श्वैत्यक्रीडनयोः किलेत् ।
बन्धे कीलेत् केलृ चालगत्योः केलति शप्युभौ ।। २९८ ।।

कुल संस्त्याने बन्धुषु कोलति शपि कूल रोधने कूलेत् ।
अदने गलतीत्यथ चौ गालयते गालते तङ्वात् ।। २९९ ।।

चौ भृत्यां चालयते शपि कम्पे चलति शे विला(सौ ? से), शे ।
वसने चिलति, गतौ चलनेऽपि च चेलतीति शपि चेलेः ।। ३०० ।।

---

२९६ कल शब्दसंख्यानयोः I. आ. कल क्षेपे X. उ. वेल कालोपदेशे X. उ. इत्यत्र माधवः- काल इत्यपि धातुरिति मैत्रेयः । कल गतौ संख्याने च X. उ. अदन्तः ।

२९७ क्षर सञ्चलने इत्यत्र माधवः- क्षल इति क्वचित् पठ्यत इति I. प. ज्वलादिः । 'क्षल सञ्चये च' क्षी. 'क्षल् ज चाले चये' क. २७१. क्षल शौचकर्मणि X. उ.

२९८ किल् कि नुदौ किलश् शौक्ल्ये क्रीडे' क. २७, २७१. किल क्षेपे X. उ. क्षी. 'किल श्वैत्ये VI. प. श्वैत्यक्रीडनयोः इति मैत्रेयः मा. कील बन्धने I. प. केलृ चलने I. प.

२९९ कुल संस्त्याने बन्धुषु च I. प. कूल आवरणे I. प. गल अदने I. प. 'स्रावणेऽप्यनेकार्थत्वात्' क्षी. गल स्रवणे X आ. आकुस्मीयः ।

३०० चल भृतौ X. उ. चल कम्पने I. प. घटादिः । चल विलसने VI. प. चिल निवसने VI. प. 'चेल् चेल्लृ केलृवत्' क. २६३. चेलेश्चलनगती आर्थौ द्रुमे उक्तौ ।

CC-0. In Public Domain. Digitization by eGangotri

घान्ये शपि जलेच्चौ संवरणे जालयेदिति ।
गहने निलतीति स्यान्नीलत्वे शपि नीलति ।। ३०१ ।।

प्रतिष्ठायां शपि तलेत् तालयेच्चौ, गतौ शपि ।
तेलति, स्निग्धतायां शे तिलेच्चौ तेलयेदिति ।। ३०२ ।।

उन्माने शपि तोलेच्चौ तोलयेताप्यतूतुलत् ।
निष्कर्षे शपि तूलेच्चौ पूर्तौ तूलयते तङि ।। ३०३ ।।

विदीर्णत्वे शपि दलेद् वा मितो णावदालयत् ।
ह्रस्वेन दलयेच्चाथ दालयेच्चौ विदारणे ।। ३०४ ।।

गत्यर्थे शपि पलति त्राणे पालयेदथ क्षेपे ।
पेलयति (ति?) रोधने शपि पीलति पेलृ गतिचलनयोः पेलेत् ।। ३०५ ।।

---

३०१ 'जल घान्ये I. प. घान्यमतैक्ष्ण्यम् प्र. 'धात्ये' क्षी. धान्ये मैत्रेयः । घातने मा. 'जलक् पिधाने, जल ज घान्ये' क. २७४. जल अपवारणे X. उ. णिल गहने VI. प. णील वर्णे I. प.

३०२ 'तल प्रतिष्ठायाम्' X. प. प्र. 'तल् कि प्रतिष्ठितौ' क. २७६. तल प्रतिष्ठायाम् X. उ. तिल गतौ I. प. तिल स्नेहने VI. प. तिल स्नेहने X. उ.

३०३ 'तुल् क्युन्मितौ' क. २७६. तुल उन्माने X. उ. तूल निष्कर्षे I. प. 'तुल् निष्कर्षे' क. २७६. इत्युदुपधोऽपि । 'तूल पूरणे X. आ. प्र. क. 'तूल् कङ पूरणे' क. २७६.

३०४ दल बिशरणे I. प. 'विदारणे प्र. 'दल् मि भेदे' क. २७६. मि' विकल्पित-मित्त्ववत् । दल विशरणे X. उ.

३०५ पल गत्तौ I. प. पाल रक्षणे X. उ. 'पिल प्रेरणे X. प्र. क. क्षेपार्थो मृग्यः । 'पिल् क् नुदि' क. २७७. पील प्रतिष्टम्भे I. प पेलृ गतौ I प. पल् ज् पल्ल गतौ, पेलृ चाले च' क. २७७.

CC-0. In Public Domain. Digitization by eGangotri

महत्त्वे शपि पोलेच्छे पुलेच्चौ पोलयेत् पुलेः ।
सङ्घाते शपि पूलेच्चौ पूलयेताप्यपूलयत् ।। ३०६ ।।

गत्यां तथैव निष्पत्तौ विशीर्णत्वविकासयोः ।
शपि क्रमात् फलेत् त्रिभ्यो गत्यर्थोऽयं ज्वलादिगः ।। ३०७ ।।

बिश्राणनस्मृतिवधेषु बलेद् बलेत ।
स्यात् प्राणने बलति शप्यथ चिन्तनायाम् ।
चौ बालयेत बलने बलयेत मित्त्वात्
क्षेपे त्वबीबलदिह स्मरणे तङेव ।। ३९८ ।।

शे भेदने बिलति चौ बेलयते शपि विहिंसवितरणयोः ।
परिभाषणे च(ब ? भ)लते चौ तङयाभाण्डने तु भालयते ।। ३०९ ।।

---

३०६ पुल महत्त्वे I. प. 'पुल महत्त्वे । तुदादौ चायं क्षीरस्वामिनः । भूवादौ च स एवाह तुदादौ पुलतीति' पुरुषकारः P–९६. नायं मुद्रिते तरङ्गिण्याम् । 'पुल श् पुल् ज महत्त्वे' क. २७७. पूल सङ्घाते I. प. पूल संघाते X. प.

३०७ 'फल गतौ' I. प. प्र. क. ञिफला विशरणे I. प. 'तच्च विशीर्णत्वं विकसनं च' प्र. 'ञिफला भिदि । फल् निष्पत्तौ फल् ज गतौ' क. २७८.

३०८ 'क् वल् म जीवने । बल ज् धान्यावरोधे च, बल ङ दाने वधे बलक् । ङ च नीरूपणे' क. २७८, २७९. दानवधनिरूपणानि द्रुममात्रदृष्टानि । 'गत्यर्थेऽपि काशकृत्स्नेनोक्तम्' पा. धा. स. बल प्राणने धान्यावरोधे च I. प. ज्वलादिः बल प्राणने X. ज्ञपादित्वान्मित् । बल निरूपणे X. आ. प्र. क. क्षेपार्थो मृग्यः ।

३०९ बिल भेदने VI. प. बिल भेदने X (उ ?) 'बेलतीति शपि इत्यात्रेयः' मा. भल भल्ल परिभाषणहिंसादानेषु I. आ. भल आभाण्डने X. आ. आभाण्डन– मार्जनम् । 'निरूपणम्' क्षी.

CC-0. In Public Domain. Digitization by eGangotri

धरणे शपि मलते मलकरणे मलयेत् कथादितः, श्लेषे ।
अमिलत् सङ्गमने मिलति मिलेत निमेषणे तु शपि मीलेत् ३१० ।।

चौ रोहणे मोलयति मोलयेत प्रतिष्ठितौ ।
शपि मूलेद् रोहणार्थे मूलयेन्मूलयेत चौ ।। ३११ ।।

विलासार्थे शपि ललेदीप्सायां लालयेत चौ ।
तङेवाथ कथादेः स्याल्ललयेदललापयत् ।। ३१२ ।।

संवरणे शे विलति क्षेपे चौ वेलयेत, शपि चलने ।
वेलेत् कालोपदिशौ वेलापयते कथादिगतात् ।। ३१३ ।।

गमने वेगे च शलेद् द्वाभ्यां संवरणचलनयोः शलते ।
शप्येते, श्लाघे चौ शालयते तङयशालतेति शपि ।। ३१४ ।।

---

३१० मल धारणे I आ· 'चुराद्यदन्तान्मलयतीति भट्टिः' क्षी. मिल श्लेषणे VI प· मिल सङ्गमने VI. उ· मील निमेषणे I· प·

३११ मूल रोहणे X· उ. 'मुल इति नन्दी' क्षी· मूल प्रतिष्ठायम् I· प· 'मुल् मूल् क रोहणे मूलञ् प्रतिष्ठायां' क· २८२. शप्यात्मनेपद्यपि द्रुमे ।

३१२ लल विलासे I· प· लल ईप्सायाम् X· आ· आकुस्मीयः । 'लल ईप्सायाम् । ललयति' प्र. क· अदन्तः ।

३१३ विल संवरणें VI. प· बिल क्षेपे X. उ· वेलृ चलने I. प· वेल कालोपदेशे X· उ· कथादिः ।

३१४ शल गतौ I. प· 'शल श्वल्ल श्वल वेगे' क· २८२· द्रुमे एव वेगार्थः । शल चलनसंवरणयोः I· आ· शठ श्लाघायाम् X· आ· आकुस्मीयः । 'शल इति कौशिकः' क्षी. 'शल् ङक् श्लाघे' क· २८२· 'शट श्लाघायाम् । शाटयते' प्र. क. शाडृ श्लाघायाम् I· आ. डलयोरेकत्वस्मरणात् शालते इत्यपि । 'ङ शालृ कत्थने' क· २८२·

CC-0. In Public Domain. Digitization by eGangotri

उञ्छे शिलेच्छपि गतौ चलनेऽपि च शेलति ।
समाधौ शीलतीत्यभ्यासे कथादेरशीलयत् ।। ३१५ ।।

षल सल गतौ शपि सलत्यथोञ्छने शे सिलेद् गतौ चलने ।
शपि सेलति चलनार्थे दन्त्यादेः सेलयेदिति चौ ।। ३१६ ।।

स्थानीभावे स्थलति ज्वालादिकयोरथ स्फुल स्फुरणे ।
चलने च स्फुलति स्याच्चलने पुनरस्फुलीदिति च ।। ६१७ ।।

निरासे क्षेवति क्षीव्येत् क्षेवेत् क्षीवेदयं द्वयोः ।
दर्पे(क्षे ? क्षी)वेदिह द्वितीयिकं श्यन्यपरे शपि ।। ३१८ ।।

---

३१५ शिल उञ्छे VI. प. शेलृ गतौ I. प. 'शेल षेलृ केल्वत्' क. २८३. 'केल तु . ...चालगत्योः' क. २७०. शील समाधौ I. प. शील उपधारणे X. उ. 'उपधारणमभ्यासः' मा.

३१६ षल सल गतौ I. प. षिल उञ्छे VI. प. 'सेलृ चलने' X. प. प्र. क. 'सेलृ क् वेले' क. २८५.

३१७ स्थल ष्ठल स्थाने I. प. ज्वलादिः । स्फुल सञ्चलने VI. प. 'स्खल् मि चये चले । स्फुल् शि स्फूर्तौ च' क. २८४. 'स्फुर स्फुल सञ्चलने । स्फुर स्फुरणे स्फुल सञ्चलने इत्येके । तत्र स्फुरणं शोभा' तुदादौ प्र. स्फुलेः कुटादित्वात् गाङ्कुटादिभ्य इति ङित्वादगुणत्वे अस्फुलीत् ।

३१८ क्षीवृ निरसने I. प. प्र. क. क्षिवु निरसने IV. प. प्र. क. 'क्षिव । क्षिव ष्ठ क्षीव निरासे' क. २८८. क्षीवृ मदे I. प. प्र. क.

CC-0. In Public Domain. Digitization by eGangotri

दर्पे गर्वति शप्येष गर्व माने कथादिगौ ?।
गर्वयेत तङेवात्वैतस्मादुभयमन्यतः ? ।। ३१९ ।।

अदने शपि चर्वति चौ चर्वयते चीवृ संवृत्तावादाने ।
चीवति चीवेत च शपि चौ दीपनवचनयोः पुनश्चीवयते ।। ३२० ।।

ऐश्वर्यद्युतिकेलियानविजिगीषोक्तिक्रियादिस्तुति–
ष्वष्टासु श्यनि दीव्यतीत्यथ शपि स्यात् प्रीणने दिन्वति ।
कूजामर्दनयोरदेवयददेवद् देवयेतेति चौ,
कूजे देवति देवयेत तङि, शब् द्युत्यादिके देवते ।। ३२१ ।।

पूर्तौ चौ पर्वयते शपि पर्वति पूर्वतीति पूर्व निवासे ।
चौ पूर्वयते शब्दे मर्वयते पूर्तिगमनयोः शपि मर्वेत् ३२२ ।।

---

३१९ गर्व दर्पे I. प. गर्व माने X. आ. आगर्वादात्मनेपदिनः इति तङेव ।

३२० चर्व अदने I. प. 'चर्व कि तु भक्षे' क. २९०. चीवृ आदान-संवरणयोः I. उ. चीव भाषा(सा)र्थः X. उ.

३२१ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' IV. प. मा. मोदमदस्वप्नकान्तयो क्षीरतरङ्गिण्यां प्रक्रियासर्वस्वे च न । 'दिव् यु जिगी–षेच्छापणिद्युतौ । क्रीडागत्योश्च' क. २९१-९२. दिवि प्रीणने I. प. दिवु मर्दने X. प. परिकूजन इति केचित् । उदित्त्वाण्णिज्विकल्पः । दिवु परिकूजने X. आ. आकुस्मीयः । तेवृ देवृ देवने I. आ

३२२ 'पर्व पूरणे' X. उ. प्र. क. 'पर्व पुर्व पूर्तौ' क. २९४. इति शप्येव मुद्रिते द्रुमे 'पुर्व निकेतने' X. उ. प्र. क. 'पूर्वक् निकेतने' क. २९४. शपि न दृष्टः । मर्व शब्दे X. उ. 'मर्व पूर्तौ गतौ' क. २९४.

CC-0. In Public Domain. Digitization by eGangotri

सेवे सिन्वेच्छप्यथो तन्तुसन्ता--
नार्थे सीव्येत् सेवने षेवृ षेवृ ।
सेवृ त्रिष्वेष्वादिमात् तङ पराभ्यां
द्वे द्वे सेवेतापि सेवेत सेवेत् ।। ३२३ ।।

ष्ठीवने ष्ठीवति ष्ठीव्येत् षान्त्व सान्त्व च सान्त्वने ।
चौ द्वयोः सान्त्वयेदन्त्यात् सान्त्वापयत इत्यपि ।। ३२४ ।।

अश भोजन इत्यस्य श्नायामश्नाति सिद्ध्यति ।
अशू व्याप्तौ तथा सङ्घाते च श्नौ तङवतोऽश्नुते ।। ३२५ ।।

गतिशासनयोः कष्टे लुकि शब्दे कशेच्छपि ।
काशृ दीप्तौ शप्श्यनोस्तङ काशते काश्यते क्रमात् ।। ३२६ ।।

---

३२३ णिवि सेचने I. प. अस्य स्थाने षिवि इति केचित् । सेवने इति तरङ्गिण्याम् । षिवु तन्तुसन्ताने IV. प. 'षेवृ' माधवमते आत्मनेपदी । 'षेवृ ङ ञ सेवने' 'ङञ सेवृ सेवे' क. २९६, २९७. द्रुममाधवमते संगृह्यैवमुक्तिः ।

३२४ ष्ठिवु निरसने I. प. सुब्धातुष्ठिवुष्वक्कतीनां प्रतिषेधः' इति न सत्वम् । 'ष्ठिवुक्लमु–' इति दीर्घः । ष्ठिवु निरसने IV. प. षान्त्व सान्त्व सामप्रयोगे X. उ. 'सान्त्व साम त्क सान्त्वने' क. ३६. इत्यदन्तोऽपि ।

३२५ अश भोजने IX. प. अशू व्याप्तौ सङघाते च V. आ.

३२६ कश गतिशासनयोः II. आ. कश शब्दे I. प. प्र. क. 'कश शब्दे' क. २९८. काशृ दीप्तौ IV. आ.

CC-0. In Public Domain. Digitization by eGangotri

स्याद् कुशिर् श्लेषणे कुश्येत्, कुशि दीपनभाषयोः ।
चौ कुंशयते कुंशेदकुंशयदिति त्रिधा ॥ ३२७ ॥

उपतापे क्लिश्येत क्लिश्येत् क्लिश्येत बाधनेऽक्लिश्नात् ।
शपि तापनोपतापव्यवतोक्ते क्लेशते तङि क्लेशेः ॥ ३२८ ॥

दंशने दशतीति स्याच्छपि दंशयते तङि ।
उक्तिदीपनयोर्दंशेद् दंशयेद् दंशयेत चौ ॥ ३२९ ॥

वधे छन्दसि दाश्नोति श्नौ, दाने शपि दाशति ।
दाशते, चावयं तङ्वानेव दाशयते ततः ॥ ३३० ॥

---

३२७ 'कुशिर् श्लेषणे । कुश्यति' IV. प. प्र. क. 'कुश् येर् श्लिषि' क. २९९. कुशि भाषा(सा)र्थः X. उ. इदित्त्वाण्णिज्विकल्पः । अणिचि परस्मैपदम् ।

३२८ क्लिश उपतापे IV. आ. 'क्लिशु उपतापे । उदात्तः स्वरितेत् । क्लिश्यति । क्लिश्यते प्र. क. (दिवादौ) । 'क्लिश् युङञ चोपतापे' क. २९९. क्लिशू विबाधने IX. प. 'क्लेश व्यक्तायां वाचि (I. आ.) बाधन इत्येके । उपतापे च द्रुमे । 'अव्यक्तायां वाचि' मा.

३२९ दन्श दंशने I. प. दन्शसन्जस्वन्जां शपि' इति नलोपः । दशि दंशने X. आ आकुस्मीयः । दशि भाषा(सा)र्थः । X. उ.

३३० दाश दाशृ हिंसायाम् । V. प. छान्दसः । दाशृ दाने I उ. दाशृ दाने X. आ. आकुस्मीयः क्षी. 'दासृ' मा. 'दाशृङ क. दाने' क. ३०१.

CC-0. In Public Domain. Digitization by eGangotri

चौ बन्धे पाशयते शपि बाधग्रन्थयोः पशेत पशेत् ।
स्पर्शगतिबन्धबाधेषु पशापयते कथादितोऽप्रादेः ।। ३३१ ।।

पिशृ पेशृ गतौ पेशेदुभयोरगुणे भिदा ।
पिशेत्यवयवीभावे मुचादौ नुमि पिंशति ।। ३३२ ।।

स्रंसे भ्रंशेत द्युतादेरधःपा–
तार्थे भ्रश्येदेष पौषादिकाभ्याम् ।
चौ स्याद् (भ्रं ? भृं) शेद् (भ्रं ? भृं) शयेद् दीपनोक्त्यो–
र्दीप्त्यर्थे तु भ्राशते भ्रश्यते द्वौ ।। ३३३ ।।

वधे रुशेद् दीपनभाषयोरुंशेद् रुंशयेच्चौ गमने लिशेत् शे ।
श्यन्यल्पतायां तङि लिश्यते कुत्सने च कण्ड्वादिगतादलिश्यत् ।। ३३४ ।।

---

३३१ पश बन्धने X. उ. 'पशञ् बाधे ग्रन्थे पशक् बन्धे' क, ३०१, ३०२. 'पश अनुपसर्गाद् बन्धबाधस्पर्शगतिषु (X. उ.)। पशयति। सोपसर्गात्तु प्रपाशयति'। प्र. क. (अदन्तः)। पुकि रूपमुक्तम्।

३३२ पिसृ पेसृ गतौ I. प. 'इह क्वचित्कोशे विसृ वेसृ पिशृ पेशृ इत्यपि **पठ्यन्ते' मा.** पिश अवयवे VI. प. मुचादिः।

३३३ भ्रंशु अवस्रंसने I. आ. द्युतादिः। भ्रंशु अधःपतने IV. प. पुषादिः। 'अनिदिता'मिति नलोपः। भृशु अधःपतने IV. प. भृश्येदिति रूपं **ज्ञेयम्।** भृशि भाषा(सा)र्थः। X. उ. टुभ्राशृ दीप्तौ I. आ. 'वा भ्राश–' **इत्यादिना वा** श्यन्।

३३४ रुश हिंसायाम् VI. उ. रुशि भाषा(सा)र्थः X. उ. लिश गतौ VI. प. लिश अल्पीभावे IV. आ. 'लिट् अल्पार्थे कुत्सायां च। लिश् इति हरः। लिट्यति लिश्यति वौदनः। अल्पीभवति कुत्सितो भवतीति वार्थः' प्र. (कण्ड्वादौ)।

CC-0. In Public Domain. Digitization by eGangotri

इच्छायां वष्टि रवे वाश्येत स्पशनबाधयोः स्पशति ।
स्पशतेऽपि शपि, श्लेषग्रहयोश्चौ स्पाशयेत तङ्येव ॥ ३३५ ॥

गत्यामिष्यति वाञ्छ इच्छति पुनः श्न्याभीक्ष्ण्य इष्णात्यथो
शप्येवोञ्छन ऐषद् ईषगतिहिंसादर्शनेष्वीषते ।
तङ्वानेषृ गतावितः शपि भवेदेषेत दाहे पुनः
स्यादोषेत् पुनरूष सङ्घरुजयोरित्यस्य (रू?तू)षेदिति ॥ ३३६ ॥

कृषेराकर्षणक्षेत्रादिवि(कार ? लेखन)योः शपि ।
कर्षेदक्षान्तिमार्थे शे कृषते कृषतीत्युभौ ॥ ३३७ ॥

---

३३५ वश कान्तौ II. प. वाशृ शब्दे IV. आ. स्पश बाधनस्पशनयोः 1. उ 'हिंसार्थं दोषसूचनं स्पशनम्' प्र. 'स्पर्शनयोः' मा. 'स्पाशनं ग्रन्थनमिति स्वामी मा. स्पश ग्रहसंश्लेषणयोः X. आ. (आकुस्मीयः) ।

३३६ इष गतौ IV. प. इष इच्छायाम् VI. प. इष आभीक्ष्ण्ये IX. प. ईष उञ्छे I. प. ईष गतिहिंसादर्शनेषु I. आ. एषृ गतौ I. आ. उष दाहे I. प. ऊष रुजायाम् I प. सङ्घार्थो मृग्यः । 'उषूष् वधे दह्यष् रोगे' क. ३०७. 'ऊष छुरणार्थे' X. क्षी.

३३७ कृष विलेखने I. प. 'विलेखनमिहाकर्षणम्' प्र. कृष विलेखने VI. उ. 'तदत्र हलकर्म' प्र.

CC-0. In Public Domain. Digitization by eGangotri

घुषिर्घुषृ ध्वन्यविशब्दयोरघो-

पत् कान्तिकृत्यां शपि घुँषते नुतौ ।

विशब्दने घोषति घोषयेन्निता-

न्ताक्रन्द आघोषयतीति चौ घुषेः ।' ३३८ ॥

दानगत्योर्घटादिः षिद् जंक्षते भक्षहासयोः ।

जक्षितीत्यथ सेवायां जेषेद् गत्यामजेषत ॥ ३३९ ॥

सेवाप्रीत्योर्जुषते यावूहे तर्पणे च हिंसायाम् ।

जोषति जोषयतीत्यपि जूष वधे जूषतीति शपि......॥ ३४० ॥

---

३३८ घुषिर् अविशब्दनार्थः । I. प. ऋदिदित्येके । आविष्कृतार्थ वचनं विशब्दनम् । तद्व्यतिरिक्तेऽर्थेऽयं धातुः। स चार्थः शब्दमात्रं वा यथाप्रयोगमन्यो वा । शब्दे घोषति घण्ट । एवमन्य ऊह्यः । घुषिर् विशब्दने इत्येवैके । घृषि कान्तिकरणे I. आ. 'घुषिर् विशब्दने X. प. (शब्देन स्वाभिप्रायप्रकाशनं तत् । अस्य णिज्विकल्पो भाष्योक्तः । घोषयन्ति घोषन्ति वा याचकाः' । प्र. 'आङः क्रन्द सातत्ये (X) इत्यत्र केचित् घुषिशेषत्वेनाङः परो घुषिः क्रन्दसातत्ये णिचं भजते इति व्याख्यन् । आघोषयत्ति' प्र. विषयोऽयं माधवेनाप्युक्तः । 'घुष् कि इर् ह्नु (नु)तौ विशब्दे' क. ३०९.

३३९ 'जक्षि गतिदानयोः । I. आ. उदात्ता अनुदात्तेतः षितश्च' प्र. क. 'जेषृ ङ । गत्यां जक्षि म्ङ दाने च' क. ३११. जक्ष भक्षहसनयोः II. प. जेषृ गतौ I. आ. 'जिषु सेवने' (I. प.) प्र. मेचने मा.

३४० जुषी प्रीतिसेवनयोः । VI. आ. जुष परितर्कणे X. उ. 'परितर्कणमूहो हिंसा वा । परितर्पणे परितृप्तिक्रियायामिति क्षीरस्वामी' मा. जूष हिंसायाम् I. प.

CC-0. In Public Domain. Digitization by eGangotri

शपि स्याज्झष हिंसायामस्योदात्तेत्त्वतो झषेत् ।
झष आदानसंवृत्योः स्वरितेज्झषते झषेत् ।। ३४१ ।।

ग्रहे त्वचो ग्रहे संवृत्यां च तक्षति तर्जने ।
तक्षेत् तनूकृतौ तक्ष्णोत्ययं श्नावादिमौ शपि ।। ६४२ ।।

तुष प्रीतौ तोषति शप्यथ पौषादिकाद् भवेत् ।
अतुष्यदिति तूषेति तुष्टौ तूषति शप्यसौ ।। ३४३ ।।

दक्ष वृद्धित्वरणयोर्जक्ष गत्यां च हिंसने ।
शप्युभौ दक्षते घाटादिकोऽन्त्य इति भिद्यते ।। ३४४ ।।

वधसङ्घयोरधर्षद् धाष्टर्ये धृष्णोति शक्तिबन्धे चौ ।
तङि धर्षयते यौ प्रसहने पुनर्धर्षयेत धर्षति च ।। ६४५ ।।

---

३४१ झष हिंसायाम् I. प. झष आदानसंवरणयोः I. उ.

३४२ तक्ष त्वचने I. प. 'त्वचनं संवरणमिति दुर्गकाश्यपमैत्रेयाः । त्वचो ग्रहणमिति स्वामी' मा, 'ग्रहणमात्रे च द्रुमें' प्र. 'त्वक्ष् त्वचि ग्राहे' क. ३१३. तक्षू तनूकरणे I. प. 'तनूकरणे तक्षः' इति पाक्षिकः श्नुः । तर्जनार्थो मृग्यः ।

३४३ तुष् तुष्टौ, तुष्लृ यौत्रि च' क. ३१२. तुष तुष्टौ IV प. तूष तुष्टौ I. प. द्रुमे तुष् इत्यस्य तूष् इत्यपि पाठः । तुष् तुष्टौ इति द्रुमेऽधिकभ्वादौ प्रक्रिया-सर्वस्वे नास्ति ।

३४४ दक्ष वृद्धौ शीघ्रार्थे च I. आ. दक्ष गतिहिंसनयोः I. आ. (घटादिः) ।

३४५ धृषङ क शक्तिबन्धे त्रिधृषा न् प्रागल्भ्ये धृषु संहतौ । हिंसे, धृषा कि त्वमर्षे क. ३१५, ३१६. 'धृष शक्तिसंबन्धने X. आ. प्र. क. 'धृष हिंसासंहत्योः' I. प. प्र, क. त्रिधृषा प्रगल्भ्ये V. प. धृष प्रसहने X. उ. आधृषीयः ।

CC-0. In Public Domain. Digitization by eGangotri

शपि बाधग्रन्थनयोरपषत् पषतेऽथ बन्धने चौ यौ ।
पाषयति पषेत् स्पर्शादिषु चतुर्षु पशापिवत् पषापयते ।। ३४६ ।।

ग्रहणादित्रये पक्षेदसौ शपि परिग्रहे ।
चौ पक्षयेत काथादिकस्य पक्षापयेद् भिदा ।। ३४७ ।।

पुष्टौ पोषति पुष्येच्च पुष्णातीति त्रिधाथ चौ ।
धारणे पोषयेत् पूष वृद्धौ शप्येष पूषति ।। ३४८ ।।

प्युषिर्दाहे विभागे च श्यन्यप्योषीत् तथाप्युषत् ।
सर्गे चावनिरिद् प्योषयते प्योषयतीत्युभौ ।। ३४९ ।।

---

३४६ 'पष् क॰ बन्धे पषञ् बाधे ग्रन्थे' क. ३१७. 'पष बन्धने चैके । पाषयति पषति' प्र. (आधृषीयः) । 'पष अनुपसर्गात्' अयमनुपसर्गो गतावदन्तः । पषयति व्रजम् । सोपसर्गात्तु प्रपाषयति । बाधबन्धस्पशेनेषु च द्रुमे । प्र. (कथादिः) । पशधातुः ३३१ तमे श्लोके द्रष्टव्यः ।

३४७ 'तक्ष त्वचने' इत्यत्र प्रक्रियासर्वस्वे 'पक्ष इत्यप्येके' इति । तक्षेः ग्रहणाद्यर्थाः ३४२ तमे श्लोके उक्ताः । पक्ष परिग्रहे X. उ. पक्ष परिग्रहे X. उ. 'पक्ष परिग्रहे पक्षयति' प्र. क. (कथादि) । कथादित्वात् पुक् ।

३४८ पुष पुष्टौ I. प., IV. प., IX. प. पुष धारणे X. उ. पूष वृद्धौ I. प.

३४९ प्युषिर् दाहविभागयोः प्युष्यति । वुसिर् विभागे वुस्यति प्र. क. 'प्रुषु दह्यमू । रलौ, प्लुष् यलृ च, प्युष् येर् भागे च प्युष कुत्सृजि' क. ३१८. 'प्युष सर्गे प्योषयति' प्र. क. (चुरादिः) पकारादिर्मुद्रिते द्रुमे ।

CC-0. In Public Domain. Digitization by eGangotri

प्रुषु दाहे शपि प्रोषेत् प्रुष स्नेहनदाहयोः ।
सेचने मोचने पूरणे प्रुष्णात्यु (दि)दादिमः ।। ३५० ।।

दाहे प्लोषति दैवादिकस्य पौषादिकस्य च ।
प्लुष्यति, स्नेहनाद्येषु प्लुष्णात्यत्नादि शप्युदित् ।। ३५१ ।।

पृषु हिंसनसंक्लेशसेचनार्थेषु पर्षति ।
वर्ष स्नेहन इत्येष तङ्‌वान् वर्षेत शप्युभौ ।। ३५२ ।।

शपि श्वशब्दे भषति स्फुटोक्तौ
भाषेत भुक्तौ पुनरत्र भक्षेत् ।
भक्षेत, चौ भक्षयतेऽथ भूषा–
यां भूषयेच्चौ शपि भूषतीति ।। ३५३ ।।

---

३५० प्रुषु दाहे I. प. 'प्रुषग् सेकपूर्त्योश्च, प्रुषु दह्यमू । रलौ' क. ३१८. 'प्रुष प्लुष स्नेहनसेचनपूरणेषु । मोचनदाहयोरप्याह शङ्करः' । प्र. (क्र्यादौ) । प्रुष प्लुष स्नेहनसेवनपूरणेषु' मा.

३५१ प्लुषु दाहे I. प. प्लुष च । प्लुष्यतीत्यादि पूर्ववत् । अयं पुषादावपि पठयते । फलमङ्गोऽपि सिद्धिरिति स्वामी। मा. स्नेहनाद्या अनन्तरोक्ताः ।

३५२ पृषु सेचनहिंसाक्लेशनेषु I. प. वर्ष स्नेहने I. आ.

३५३ भष भर्त्सने I. प. 'इह भर्त्सनं श्वरवः' मा. भाष व्यक्तायां वाचि I. आ. भक्ष अदने I. उ. भक्ष अदने X. उ. भूष अलङ्कारे I. प., X. उ.

CC-0. In Public Domain. Digitization by eGangotri

मिषु सेवन इत्यस्य मेषतीति भवेच्छपि ।
अनुदित् स्पर्धनार्थः शे मिषत्युन्मीलनेऽप्यसौ ।। ३५४ ।।

वधे मोषति खण्डे स्यादिरितः श्यनि मुष्यति ।
मुष स्तेये श्नयमुष्णान्मूष स्तेये शपि मूषति ।। ३५५ ।।

क्षान्तौ मृषेत मृषयेन्मृषतीत्यदन्ता–
न्मर्षेदमर्षयत मर्षत इत्यमी यौ ।
मृष्येत मृष्यति दिवादिजुषोऽथ दैन्य–
संक्लेशसेचनवधेष्वपि मर्षतीति ।। ३५६ ।।

सङ्घाते शप्यमृक्षच्चौ मृक्षयेदपशब्दने ।
मोक्ष क्षेपे मोक्षति शप्येष मोक्षयतीति चौ ।। ३५७ ।।

---

३५४ 'मिषु सेवने' I. प. प्र. सेवनार्थोऽत्रैव । 'सेचने' मा. मिष स्पर्धायाम् VI. प. 'अयमुन्मीलनार्थोऽपि' । प्र.

३५५ 'मष् मुष् वधे, मुष् य इर् छिदि मुष् ग मूष् लुण्ठने' क. ३२०, ३२१. 'मुष वधे, मोषति' । प्र. क. मुष हिंसार्थः I. प. क्षी. मुष स्तेये IX. प. 'मुस खण्डने मुष इत्येके' प्र. दिवादिः पुषादिः ।

३५६ 'मृष तितिक्षायाम् । अस्य णिज्विकल्पो, णिजभावेऽप्यदन्तत्वमुभयदर्दित्वं चास्ति । मृषयति मृषति मृषते' प्र. क. (चुरादिरदन्तः) । मृष तितिक्षायाम् X. उ. आधृषीयः । मृष तितिक्षायाम् IV. उ. 'पृषु वृषु मृषु सेचने । आद्यौ हिंसाक्लेशनयोश्च । वृषु प्रजननैश्वर्ययोः । मृषु हिंसासंक्लेशदैन्येषु इत्येके' प्र. (भ्वादौ) ।

३५७ मृक्ष संघाते I. प. मृक्ष म्लेच्छने । अपशब्दनं तत्' प्र. (चुरादौ) । 'मोक्ष असने' प्र. क. 'मोक्ष कि क्षेपे' क. ३२२. मोक्ष असने X. उ.

CC-0. In Public Domain. Digitization by eGangotri

वधे रेषेत् पुषादौ रोषव्यथादौ च रिष्यति ।
स्याद् रेषृ वृकशब्दे शप्यनुदात्तेदरेषत ।। ३५८ ।।

रोषवधयोररोषद् रोषे पौषादिकादरुष्यच्चौ ।
रोषयति, लेपने शपि रूषापयेत् कथादिगतात् ।। ३५९ ।।

कान्तौ लषेल्लषेतापि लष्येल्लष्येत शप्श्यनोः ।
चौ शिल्पयोगशिल्पोपयोगयोर्लाषयेदिति ।। ३६० ।।

अङ्कने दर्शने च स्याल्लक्षयेल्लक्षयेत चौ ।
लक्ष आलोचने तङ्वानेवासौ लक्षयेत चौ ।। ३६१ ।।

लुष मोषण इत्यस्मादलोषल्लूष लेपने ।
लूषतीति शपीमौ द्वौ हिंसायां लूषयेत चौ ।। ३६२ ।।

---

३५८ रिष हिंसायाम् I. प. रुष रोषे इत्यत्र माधवः–'इह केचिद् रिष हिंसायां च इति पठन्ति' IV. प. रेषृ अव्यक्ते शब्दे I. आ. 'अयं स्वभावाद् वृकविषयः' । मा.

३५९ रुष हिंसार्थः I. प. रुष् येर् ञि क्रुधि रुष् तथा' क. ३२३. रुष रोषे X. उ. रूप (I. प.) रूपायाम् इत्येके' प्र. 'रूष रूपायाम् । (X. उ. अदन्तः) रूषयति देहं चन्दनेन' प्र. क. 'रूप तक स्याद्विच्छुरणे' क. ३०.

३६० लष कान्तौ I. उ. 'वा भ्राशे' त्यादिना श्यन्विकल्पः । 'लस शिल्पयोगे (X. उ.)। अत्र स्वामी शिल्पोपयोग इति पठित्वा केचिन्मूर्धन्यन्तं पठन्ति इत्याह' । मा.

३६१ लक्ष दर्शनाङ्कनयोः X. उ. लक्ष आलोचने X. आ. आकुस्मीयः ।

३६२ 'लुष स्तेये लोषति' प्र. क. 'लुष् च स्तेये' क. ३२४. मूष स्तेये इत्यत्र लूष रूष भूषायामिति सुधाकरः' मा. 'लूष रूष रूषायामित्येके । रूषा लेपनम् । प्र. (भ्वादौ) । लूष हिंसायाम् X. उ.

CC-0. In Public Domain. Digitization by eGangotri

स्निग्धीभावेऽवर्षत तङि संक्लेशवधसेचने वर्षेत् ।
चौ तङ्यैश्वर्ये शक्तिबन्धसंबन्धयोश्च वर्षयेत ।। ३६३ ।।

विप्रयोगे श्नि विष्णाति श्लौ व्याप्तौ विष्लृ इत्यतः ।
स्यातां वेवेष्टि वेविष्टे सेवने शपि वेषति ।। ३६४ ।।

दिवादौ व्युष दाहार्थे व्युष्यतीत्यस्य सिध्यति ।
अस्यैव पौषादिकताप्यस्ति तत्राव्युषल्लुङि ।। ३६५ ।।

स्याद्धिंसायां शेषति विशिनष्टीति विशेषणे ।
यावसर्वोपयोगार्थे स्यातां शेषति शेषयेत् ।। ३६६ ।।

श्लिषु दाहे शपि श्लेषेत्, पुषादौ परिरम्भणे ।
श्लिष्यति, श्लेषणे स्यातां श्लेषयेच्छ्लेषयेत चौ ।। ३६७ ।।

---

३६३ वर्ष स्नेहने I. आ. वृषु सेचने हिंसासंक्लेशनयोश्च I. प. 'कृङ वृषु प्रजनैश्र्ये' क. ३२५. वृष इति तत्र पाठान्तरम् । 'वृष शक्तिबन्धने X. आकुस्मीयः । शक्तिबन्धनं प्रजननसामर्थ्यम् । शक्तिसंबन्धने इति मैत्रेयः' मा.

३६४ विष विप्रयोगे IX. प. विष्लृ व्याप्तौ II. उ. 'विषु सेचने I. प. मा. 'सेवने' प्र.

३६५ व्युष दाहे IV. प. व्युष विभागे IV. प. पुषादिः ।

३६६ शिष हिंसायाम् I. प. शिष्लृ विशेषणे VII. प. प्रायेणायं विपूर्वः । शिष असर्वोपयोगे X. उ आधृषीयः ।

३६७ श्लिषु दाहे I. प. श्लिष आलिङ्गने IV. प. पुषादिः । श्लिष श्लेषणे X. उ.

CC-0. In Public Domain. Digitization by eGangotri

शोषे पुषादितः शुष्येदनुज्ञोत्पादनार्थयोः ।
शूषेत् तथा षूष सूष द्वयोः सूषति शप्यमी ।। ३६८ ।।

शपि ष्टृक्ष स्तृक्ष गतौ षः सत्वे स्तृक्षति द्वयोः ।
अलीकहर्षयोर्हर्षत्यन्त्ये हृष्यत्यसाविरित् ।। ३६९ ।।

शप्यादानगतिद्युतिष्वसत आसद् द्वौ भवेतां लुकि
भ्वर्थेऽस्तीत्यसनेऽस्यतीत्युदिदिरिच्चा,थोपतापार्थिनः ।
कण्ड्वाद्या अससू (ञ् सुतिय ? ञसु त्रय) इतीहास्यत्यसूयत्यसू-
येतासूयति मध्यमोऽत्र ञिदथासित्यां तङास्ते लुकि ।। ३७० ।।

श्नायामुध्रस उञ्छेऽस्मादुध्रसामास सिध्यति ।
चौ णिचश्चेति तङयुध्रासयतोध्रासयेदपि ।। ३७१ ।।

---

३६८ शुष शोषणे IV. प. पुषादिः । 'शूष प्रसवे (I. प.)। स चानुज्ञा । शूषति राजा भृत्यम् । अनुजानातीत्यर्थः । 'या लीढा श्रवसापि सौति महतीमौत्सुक्य-दुःखासिका' मित्यत्र सौतेरुत्पादनार्थप्रयोगादुत्पादनमपि प्रसवः । शूषति विश्वं हरिः' प्र. 'शूष षूष् प्रसवे' क. ३२८. 'सूष् प्रसवे' क. ३२८. 'षूष सूष प्रसवे' प्र. क.

३६९ 'ष्टृक्ष गमने' 'स्तृक्ष गत्यां' क. ३२८. स्तृक्ष गतौ I. प. 'ष्टृक्ष इति मैत्रेयः' मा. (Foot note). हृषु अलीके V. प. 'तुष्टौ च द्रुमे' प्र. 'हृषु हृष् य त्रि । इर् तुष्टौ, हृषु त्रि प्रोक्तोऽलीके' क. ३२८, ३२९.

३७० अस गतिदीप्त्यादानेषु I. उ. अस भुवि II. प. असु क्षेपणे VI. प. पुषादिः । 'अस् यु इर् क्षेपे' क. ३२९. 'असु उपतापे । अस् असूञ् इति चैके' प्र. कण्ड्वादौ । आस उपवेशने II. आ.

३७१ उध्रस उञ्छे IX. प. 'अत्र क्षीरस्वामी उकारं धात्ववयवमाह' । मा. तथात्वे 'इजादेश्चे'त्यनुप्रयोगः ।

CC-0. In Public Domain. Digitization by eGangotri

गमने कसेज्ज्वलादौ गतिशासनयोरकंस्त कंस्ते च ।
शपि कासृ कुत्सितोक्तौ कासेर्दीप्तौ च कासेत ।। ३७२ ।।

श्लेषे कुस्येदिरितो वाग्दीपनयोरकुंसयत् कुंसेत् ।
क्षेपे द्वाभ्यां कुत्सयतेऽत्रैकस्मात् तङेव चावन्त्यः ? ।। ३७३ ।।

अदने शपि ग्रसेत ग्रासयते ग्रासयेत् ग्रसेदिति यौ ।
ग्रहणे चौ ग्रासयति ग्रासयते शप्युदीरितोऽयमुदित् ।। ३७४ ।।

रक्षणे घंसते कान्तिकरणे घसते तङौ ।
भुक्तौ घसेद् लृदिदसावघसल्लुङि शप्यमी ।। ३७५ ।।

मोक्षे जस्येदिरितश्चौ हिंसायामजासयज्जसति ।
जसु ताडनेऽस्य चोक्तवदवने मोक्षे च जंसयेज्जंसेत् ।। ३७६ ।।

---

३७२ कस गमने I. प. कसि गतिशासनयोः II. आ. कासृ शब्दकुत्सायाम् I. आ. काशृ दीप्तौ I. आ. 'अन्ये दन्त्यान्त्यमिदितं पठन्ति । अनिदितमपरे' मा.

३७३ 'कुशिर् श्लेषणे (IV. प.) कुश्यति' प्र. क. 'कुस् य इर् श्लिषि' क. ३३१. 'कुसि भाषा(सा)र्थः X. उ. कुत्स अवक्षेपणे X. आ. (आकुस्मीयः) । 'कुत्सक् ङत्रवक्षेपे' क. ३३१. द्रुमे एवं द्वौ धातू ।

३७४ ग्रसु अदने I. आ. 'ग्रस अदने (युजादिः)' प्र. क. 'ग्रस् कि ग्राहे' क. ३३३ ग्रासे इति तत्र पाठान्तरम् । ग्रस ग्रहणे X. उ.

३७५ 'घसि रक्षणे । घंसते' प्र. क. 'घसि ङ क्षरणे' क. ३३२. (मुद्रिते) । घस्लृ अदने I. प. लृदित्त्वादङ ।

३७६ जसु मोक्षणे IV. प. 'जसु य इर् मोक्षे' क. ३३३. इति इरित्त्वम् । जसु हिंसायाम् X. उ. 'क्त्वायामिड्विकल्पार्थादुदित्करणादस्य णिजनित्यः' मा. जसु ताडने X. उ. जसि रक्षणे X. उ. 'मोक्षणे इति देवः' मा.

CC-0. In Public Domain. Digitization by eGangotri

शपि कौटिल्ये नसते, शब्दे नासेत तङ्य,थोदिदिरित् ।
तस्येदुपक्षये श्यनि चौ भूषायामतंसयत् तंसेत् ।। ३७७

श्यन्युद्वेगे त्रस्यति चौ ग्रहणे वारणे तथा धरणे ।
त्रासयतिदीपनोक्त्योस्त्रंसयते त्रंसयेत् त्रंसेत् ।। ३७८ ।।

भाषादीपनयोरदंसयद् अदंसद् दंसयेतेति चौ
वीक्षादंशनदंसने पुनरदंसद् दंसयेतेति तङ ।
तद्वद् दासयतेऽथ तस्यतिवदस्माद् दस्यति श्यन्यसौ
(दंसे शप्यदसद् ? भवेद्) वितरणार्थे दासते दासति ।। ३७९ ।।

उक्तमुध्रसिमुञ्छार्थमुदितं केचिदूचिरे ।
तेन लोपादुकारस्य ध्रस्नाति ध्रासयेत् क्रमात् ।। ३८० ।।

---

३७७ णस कौटिल्ये I. आ. णासृ शब्दे I. आ. तसु उपक्षये IV. प. 'तस् दस् युइर् तूपक्षये' क. ३३५. इतीरित्त्वम् । तसि अलङ्करणे X. उ.

३७८ त्रसी उद्वेगे IV. प. 'त्रस धारणे (X. उ.) ग्रहणे इति नन्दी । अत्र धारणं वारणमिति मैत्रेयः' मा. त्रसि भाषा(सा)र्थः ।

३७९ दसि भाषा(सा)र्थः X. उ. 'दसि दर्शनदंशनयोः' X. आ. आकुस्मीयः । 'आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनेति व्याख्यातारः' मा. तेन इदित्करण–सामर्थ्याण्णिजभावे परस्मैपदम् । 'दसि दंसनदर्शनयोः । दस इत्येके । दंसनं बर्मग्रहणम् । दंशनदर्शनयोरित्यन्ये' । प्र. दसु उपक्षये IV. प. दासृ दाने I. उ

३८०. ३७१ तमश्लोको दृश्यताम् ।

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थबाधनयोर्द्वौ शप्यपसत् पसतेऽथ चौ ।
नाशने पंसयेत् पंसेद् बन्धने पासयेदिति ।। ३८१ ।।

चौ दीप्तौ पिंसयते पिंसति वधदानगमनबलनेषु ।
वासे च पेसयेत विभागार्थे प्युस्यतीरिदनिरिदपि ।। ३८२ ।।

वेदे भर्त्सनदीप्त्योर्बभस्ति दीप्तावभासतेष शपि ।
भर्त्से भर्त्सयते चौ द्वाभ्यामत्रैकतस्तङेव स्यात् ।। ३८३ ।।

शब्दे शपि रसेदास्वादनस्नेहनयोः पुनः ।
रसापयेत् कथादौ स्याच्छब्दे रासेत शप्यसौ ।। ३८४ ।।

---

३८१ 'पस ग्रन्थनबाधनयोः' I. उ. प्र. क, 'पस बन्धने' X. उ. प्र. क. 'पस् क. पस् ञ् षान्तवत्' क. ३३७. 'पष् क बन्धे, पषञ् बाधे ग्रन्थे' क. ३१७ पसि नाशने X. उ.

३८२ पिसि भाषा(सा)र्थः X. उ. 'पिसि दीपने । पिंसयति पिंसति; पिस गतिहिंसाबलादाननिकेतनेषु । पेसयति' । प्र. क. (चुरादौ) । 'पिसि कि त्विषि' क. ३३७ पेस् पिसृ गत्यां, पिस् क षट्टार्थे क. ३३६. 'षट्टक् निकेतने हिंसे बले दाने' क. १४६. व्युष दाहे इत्यत्र 'क्वचिदुभयत्र विभागार्थो दन्त्यान्तः ओष्ठ्यादिश्च पठ्यते' मा. पुषादावप्ययं धातुः । तदा अङ । अन्यत्र नाङ । इति इरित्त्वं फलति ।

३८३ भस भर्त्सनदीप्त्योः III. प. भासृ दीप्तौ I. आ. भर्त्स तर्जने X. आ. आकुस्मीयः। 'लक्ष्ये भर्त्सयतीति दृश्यते' क्षी. 'क्ङ भर्त्स त्र । भर्त्से' क. ३३८.

३८४ रस शब्दे I. प. रस आस्वादनस्नेहनयोः X. उ. कथादिः । रासृ शब्दे I. अ

CC-0. In Public Domain. Digitization by eGangotri

श्लेषणे क्रीडने शोभायामपि स्याल्लसेच्छपि ।
शिल्पयोगे च शिल्पोपयोगे लासयतीति चौ ॥ ३८५ ॥

वासे शप्यनिटो वसन्ति वस आच्छादेऽस्य वस्ते लुकि
स्तम्भेऽवस्यदथापहार उपहारे छेदने स्नेहने ।
चौ स्याद् वासयतेऽवसापयदिति त्वाद्यार्थ एवोपसे-
वे वासापयतेऽनिवासयदिति त्वाच्छादनार्थे भवेत् ॥ ३८६ ॥

विसृ गमने शपि वेसति चौ वेसयतेऽथ वचनदीपनयोः ।
विंसति विंसयति द्वौ वेसृ गतौ वेसतीति शप्येव ॥ ३८७ ॥

हिंसायां शसति स्तुतावपि भवेच्छंसेदिति द्वौ शपि
स्वप्ने छन्दसि शस्ति लुक्यथ विविच्य ज्ञापने शास्त्युदित् ।
आङः शन्स शसि द्वयोरपि भवेदाशंसते शप्युभौ
लुक्याशास्त इति प्रशास्त इति च स्युर्वाञ्छनार्था अमी ॥ ३८८ ॥

---

३८५ लस श्लेषणक्रीडनयोः I. प. 'शोभायां प्रसिद्धः' प्र. लस शिल्पयोगे X. उ. 'शिल्पोपयोगे इति केचित्' प्र. शिल्पोपयोग इति स्वामी' मा.

३८६ वस निवासे I. प. वस आच्छादने II. आ. वसु स्तम्भे IV. प. पुषादिः । 'वस स्नेहनच्छेदापहरणेषु इति वा पाठः' X. उ. प्र. मा. वस निवासे X उ. कथादिः । वास उपसेवायाम् X. उ. कथादिः । निवास आच्छादने X. उ.

३८७ 'पिसृ पेसृ गमने' I. प. इत्यत्र माधवः- 'इह क्वचित् कोशे विसृ वेसृ इत्यपि पठ्यते । पटपुटेत्यादिदण्डके पिसिधातुर्माधवोक्तः । तत्स्थाने विसि इति सर्वस्वे । अतः, विसि भाषा(सा)र्थः X. उ. द्रुमे नायं दृ[illegible] ।

३८८ शसु हिंसायाम् I. प. शंसु स्तुतौ I. प. 'शस्ति, शस स्वप्ने । [illegible]ति शंस्तन्ति । शास्ति शसन्ति उदात्तावुदात्तेतौ छान्दसौ' अदादौ । [illegible] स् लुर् स्वप्ने क. ३४१. रेफो वैदिकत्वार्थः । शासु अनुशिष्टौ II. प. '[illegible]ष्टिर्विविच्य ज्ञापनम् । 'उशस् वधे । आङ्पूर्वास्तु शसिङ शासुङ शासु लङ्ङाशिषि स्मृताः' क. ३४२. आङः शास इच्छायाम् (II. आ.) उदिदित्येके । आशास्तेऽर्थम् । प्रायेणाङ्पूर्व इत्युक्तेः प्रशास्ते इत्यपि' । मा.

CC-0. In Public Domain. Digitization by eGangotri

श्नम्यस्ति हिसि हिंसायां हिनस्तीति पदं ततः ।
यौजादिकाद् हिंसयते हिंसेत् हिंसयति त्रिधा ।। ३८९ ।।

गत्यामंहेत शपि व्याप्तावह्नोति वैदिकः सोऽयम् ।
अहि दीपनोक्तयोश्चौ स्यादंहयतेंऽहयेदंहेत् ।। ३९० ।।

पूजायोग्यतयोरर्हेच्छपि चौ पूजनेऽर्हयेत् ।
उहिर् अर्दन इत्यस्मादोहत्यूहे तङूहते ।। ३९१ ।।

निन्दने गर्हयेद् गर्हेद् गर्हेयौ शपि गर्हते ।
गृहू ग्रहण इत्यस्मादपि गर्हेत तङ्युभौ ।। ३९२ ।।

गृह्णाति गृह्णीत गृहापयेत
तङ्येव चौ ग्राहयति ग्रहेद् यौ ।
ग्लहू ग्लहेद् ग्लाहयतीत्युभौ यौ
शपि ग्लहेत ग्रहणे स्युरेते ।। ३९३ ।।

---

३८९ हिसि हिंसायाम् VII. प. हिसि हिंसायाम् X. उ. आधृषीयः ।

३९० अहि गतौ I. आ. अह व्याप्तौ V. प. छान्दसः । अहि भाषा(सा)र्थः । X. उ.

३९१ अर्ह पूजायाम् I. प. 'योग्यत्वेऽपि' प्र. 'अर्ह योग्यत्वे' क. ३४४. अर्ह पूजायाम् X. उ. आधृषीयः । उहिर् अर्दने I. प. ऊह वितर्के I. आ.

३९२ गर्ह निन्दने X उ. आधृषीयः । गर्ह कुत्सायाम् I. आ. गृहू ग्रहणे I. आ.

३९३ ग्रह उपादाने IX. उ. गृह ग्रहणे X. आ. आगर्वीयः कथादिश्च । 'ग्रहू ग्लहू ग्रहणे ग्राहयति ग्रहति, ग्लाहयति ग्लहति' प्र. क. (चुरादौ विकल्पितणिचि) । 'ग्रह ग्लहू...कि आदाने' क. ३४४. गृहू ग्रहणे इत्यत्र माधवः- 'ग्लहू इति स्वामिकाश्यपसम्मताकारादयः' ।

CC-0. In Public Domain. Digitization by eGangotri

शाठ्ये दम्भे कत्थनेऽपि चहेच्छप्यथ चौ मितः ।
ह्रस्वेन चहयेत् काथादिकस्य स्याच्चहापयेत् ।। ३९४ ।।

तौदादिकौ तृहू तृन्हू हिंसायामादिमात् तृहेत् ।
नुमि तृंहेत् परादाद्यात् तृणेढीति रुधादिगात् ।। ३९५ ।।

दाहे दहति, दीप्तौ च दंहते दंहतीत्यमू ।
शप्येतेऽर्थद्वये दंहेत् दंहयेत् दंहयेत चौ ।। ३९६ ।।

अर्दने दुहिरो दोहेत् क्षारणे दोग्ध्यदुग्ध च ।
वृद्धौ दृह दृहि स्यातां शपि दर्हति दृंहति ।। ३९७ ।।

वृद्धौ बर्हति बृंहतीति गजशब्देऽप्यस्त्युभौ शब्गतौ
चौ वाग्दीपनयोरबृंहयदबृंहयद् द्वावथो बर्हते ।
प्राधान्ये शपि दीपनोक्तिहनने चौ बर्हयेत द्वयोः
प्राधान्ये शपि बल्हतेऽपि वचने चौ दीपने बल्हयेत् ।। ३९८ ।।

---

३९४ चह परिकल्कने। ·प· 'परिकल्कनं शाठ्यम्' मा. 'दम्भः शाठ्यं च' बृहद्धातुरूपावली । कत्थनार्थो मृग्यः । चह परिकल्कने X. उ. ज्ञपादित्वान्मित्त्वम् । 'तस्य मित्त्वं वा द्रुमे' प्र. 'चहक्म चह शाठ्ये' क. ३४६. इति मित्त्वमेव मुद्रिते द्रुमे ।

३९७ दुहिर् अर्दने I· प. दुह प्रपूरणे II. उ· 'प्रपूरणं पात्रादिपूरणार्थं क्षारणम् प्र. दृह दृहि वृद्धौ I· प·

३९८ बृह वृद्धौ I. प. बृहि वृद्धौ I· प. बृहि शब्दने I· प· 'बृंहितं करिगर्जितम्' मा. बृहि भाषा(सा)र्थः X उ. बर्ह प्राधान्ये I आ· बर्ह भाषा(सा)र्थः X. उ. बर्ह हिंसायाम् X. उ. बल्ह प्राधान्ये I. आ. बल्ह भाषा(सा)र्थः X. उ.

CC-0. In Public Domain. Digitization by eGangotri

वृद्धावमंहत महेदिति पूजनायां
द्वौ शब्गतौ महयतीति कथादिपाठात् ।
चौ दीपने वचसि मंहति मंहयेत
मानार्थिनः शपि तु माहति माहते च ।। ३९९ ।

त्यागे चावरहापयद् रहयतीत्येतन्मितः स्यात् पृथ-
क्त्वार्थेऽप्यस्ति रहेच्छपीह गमने रंहेद् वचोदीपने ।
रंहेद् रंहयते च रंह गमने रंहापयेच्चा,वथो
हिंसे रेहति युद्धकत्थनविनिन्दाहिंसदाने रिहेत् ।। ४०० ।।

वह प्रापण इत्यस्य वहते वहतीत्युभौ ।
वहि वृद्धौ तथा दीप्तौ तङि वंहेत शप्युभौ ।। ४०१ ।।

---

३९९ महि वृद्धौ I. आ. मह पूजायाम् I. उ. मह पूजायाम् X. उ. कथादिः । महि भाषा(सा)र्थः X. उ. माहृ माने I. उ.

४०० रह त्यागे X. उ. ज्ञपादित्वान्मित् । रह त्यागे इति कथादावपि । ततः पुक्यात्त्वे रूपम् । रह त्यागे I. प. विरहतीत्यादौ पृथक्त्वम् । रहि गमने I. प. रहि भाषा(सा)र्थः X. उ. 'रंह गतौ अदन्तः । प्र. क (चुरादौ) । 'रंह तक् गतौ' क. ३० 'रिह हिंसायम्' (I. प.) प्र. क. 'रिह वधे' क. ३४९. रिफ कत्थनयुद्धनिन्दाहिंसादानेषु (VI. प.) अत्र माधवः- 'रिहेति द्रमिलाः इति स्वामी' ।

४०१ वह प्रापणे I. उ. 'वहि वृद्धौ । वंहते' (I. आ.) प्र. क. 'वहि दीपने रंहयति रंहति' X. उ. प्र. क. 'वहिक् त्विषि' क. ३५१. णिजभावे परस्मैपदेन भाव्यमिति वंहेतेति चिन्त्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

प्राधान्ये शपि वर्हते वधवितीर्ण्योश्छादने वञ्चनो–
क्तौ वर्हेत शपि द्युतावपि वधे स्याद् वर्हयेतेति चौ ।
दीप्तौ वृंहति वृंहयेदिति भवेदुन्मूलने शे वृहेद्
वृद्धौ वर्हति किञ्च वृंहिवृहिरौ शब्दे च वृंहेच्छपि ।। ४०२ ।।

वञ्चनोक्तौ वधे दाने छादने शपि वल्हते ।
वल्ह प्राधान्य इत्यस्मादपि वल्हेत तङ्युभौ ।। ४०३ ।।

क्षान्तौ शपि सहेत स्यात् तृप्तौ च श्यनि सह्यति ।
क्षान्तावेव सहेत् साहयेत साहयति त्वयम् ।। ४०४ ।।

---

४०२ 'वर्ह वल्ह प्राधान्ये' I. आ. प्र. क. 'वर्ह वल्ह परिभाषणहिंसाच्छादनेषु । दाने च द्रुमें । परीभाषणमत्र वञ्चनवादः' (I. आ.) प्र. 'वर्ह हिंसायां च X. उ. प्र. क. चाद् दीपनेऽपि । 'वृहि दीपने' (X. उ.) प्र. क. 'क वर्ह् वधे । दीप्तौ, वर्ह् वल्ह ङ श्रैष्ठ्ये वल्हक् त्विषि, वृहि क्यपि । वृहिर् ध्वनर्द्धयोर्, वृहि च, वृह वृद्धौ शृ वृहुद्यमे' क. ३५०, ३५१. वृहू उद्यमे VI. प. 'स चोन्मूलनम्' प्र. 'वृह वृद्धौ' (I. प.) प्र. क. 'वृहि वृहिर् शब्दे च' (I. प.) प्र. क. चाद् वृद्धौ ।

४०३ पूर्वश्लोकटिप्पण्या गतार्थोऽयम् ।

४०४ षह मर्षणे I. आ. 'षुह चक्यर्थे (IV. प.) । चक्यर्थस्तृप्तिः इति स्वामिधनपालशाकटायनाः । आत्रेयमैत्रदुर्गाः षह षुह इति दौ धातू पेठुः' । मा षह मर्षणे X. उ. आधृषीयः ।

CC-0. In Public Domain. Digitization by eGangotri

पौषादिकस्निह(:)प्रीत्यर्थे स्निह्येदसौ(रु?र)धादिरपि ।
चौ स्नेहने स्निहेद् यौ स्नेहयते स्नेहयेदिति हलन्ताः ॥ ४०५ ॥

इति श्रीमातृदत्तार्यकरुणाबलशालिना ।
बालेन रचिता सेयं धातुरत्नावली जयेत् ॥ ४०६ ॥

शोधनाक्षमतमेन केनचिद् बालकेन कुतुकान्निगुम्भिताम् ।
धातुरत्नमहितावलीं बुधाः शोधयन्तु मतिशाणशीलनैः ॥ ४०७ ॥

हंहो सुधीनिवह देशिकवाङमहाब्धि-
कल्पद्रुमाद्यधिगतां गुरुदेवतुष्ट्या ।
भूयः सुवृत्तललितां समरूपधातु-
रत्नावलीं कलय कण्ठतटीलुठन्तीम्* ॥४०८ ॥

(धातुरत्नावली समाप्ता)

---

४०५ ष्णिह प्रीतौ IV. प. पुषादिः रधादिश्च । पुषादित्वादङ, रधादित्वाद् सिष्णेहिथ, सिष्णेढ इत्यादौ 'रधादिभ्यश्च' (७-२-४५) इति इड्विकल्पः । ष्णिह स्नेहने X. उ. युजादित्वं मृग्यम् ।

* एतदनन्तरम् – 'श्रीकृष्णार्पणमस्तु । धातुरत्नावली समाप्तेयम् । वस्तूनां यः स्वसंज्ञायाः प्रवृत्तौ कारणं स्मृतम् । त्वतलाद्यर्थबोध्यश्च प्रभाव इति सोदितः ॥ नमः पाणिनिकात्यायनपतञ्जलिभ्यः । नारायणेन लिखितमिदं पुस्तकम्' । इति दृश्यते ।

CC-0. In Public Domain. Digitization by eGangotri

अर्चिरादिमार्गवैभवम्

श्रीमते रामानुजाय नमः ।

श्रीरङ्गमङ्गलमहोत्सववर्धनाय
वेदार्थपान्थपरमार्थसमर्थनाय
कैङ्कर्यलक्षणविलक्षणमोक्षभाग्यो
रामानुजो विजयते यतिराजराजः ॥

इति सङ्कीर्तनार्हः श्रीरामानुजाचार्यः स्वरूपोपायपुरुषार्थान् प्रतिपाद्य सकलचेतनान् सदाचार्यसमाश्रयणयोग्यान् कृत्वा परमपदस्य गमनोपायं परमपदं मार्गं च विशदं वक्तुमारब्धवान् । अनन्तकोटिब्रह्माण्डनायकः श्रीमन्नारायणः स्वयं च स्वस्य लीलार्थं,

अण्डानां च सहस्राणि
सहस्राण्ययुतानि च ।
ईदृशानि तथा चैव
कोटिकोटिशतानि च ।

इत्थमण्डानि बहूनि सन्ति । तेष्वण्डेषु मध्ये एकस्याण्डस्य प्रमाणं कियदिति चेत्, चतुर्दशभुवनात्मकं भूत्वा स्थितम् । तानि चतुर्दशभुवनानि ब्रह्माण्डान्तर्गतानि केन क्रमेण सङ्गतानीति तत्राह—

भूलोकस्याधोभागे पाताल, रसातल, महातल, तलातल, अतल, सुतल, वितलानीति पातालसप्तकं, भूर्लोक, भुवर्लोक, स्वर्लोक, महर्लोक,

---

Ms. utilised - No. 9860

CC-0. In Public Domain. Digitization by eGangotri

जनलोक, तपोलोक, सत्यलोक इति ऊर्ध्वलोकसप्तकं च एवंप्रकारेण चतुर्दशभुवनात्मकमेकमण्डम् । तत्रैकस्य भुवनस्य प्रमाणं कियदिति चेत्, तत्र भूर्लोकस्य प्रमाणं दर्शयति:–

जम्बु, प्लक्ष, कुश, क्रौञ्च, शाक, शाल्मलि, पुष्कराणि द्वीपसप्तकं च, लवण, इक्षु, सुरा, सर्पि, दधि, दुग्ध, शुद्धोदकाः सप्त सागराश्च । एतैः परिवृतो भूत्वा पञ्चाशत्कोटिविस्तीर्णे भूमध्ये मेरुस्तिष्ठति । तस्य मेरोः भूम्यन्तर्गतं मूलं षोडशसहस्रयोजनापरिमितम् । अधोभागे मूलं विस्तीर्णं च षोडशसहस्रयोजनापरिमितम् । चतुरशीतिसहस्र-योजनमुच्छ्रितम् । उपरि द्वात्रिंशत्सहस्रयोजनपरिमितं विस्तारम् । एवं-भूतं मेरुं वेष्टयित्वा जम्बुद्वीपो लक्षयोजनविस्तारेण तिष्ठति । लक्षयोजन-विस्तीर्णो लक्षयोजनगम्भीरश्च लवणसमुद्रोऽस्ति । एतत्प्रकारेण समुद्राः द्वीपैः सह द्विगुणद्विगुणोत्तरीभूत्वा तिष्ठन्ति । अत्र जम्बुद्वीपो लक्षयोजना-त्मको मेरोरुत्तरे भागे तिष्ठति । वर्षाणि त्रीणि दक्षिणभागे । पूर्वभागे वर्षमेकम् । पश्चिमभागे वर्षमेकम् । मेरुपरितो वर्षमेकम् । तेषामेकैकं वर्षं नव नव सहस्रं योजनपरिमाणेन भारत, इलावर्त्त, किंपुरुष, भद्राश्व, केतुमाल, हिरण्मय, रम्यक, हरि, कुरु इति नवखण्डा पृथिवीति प्रसिद्धा । सम्भारभूतेभ्य उदितगर्भोदितस्य गम्भीरमण्डकटाहं सृष्ट्वा भूमि-पर्यन्तमशीतिल[illegible]सहस्रयोजनानि च अतलवितलपातालादिसप्तकस्याधारो भूत्वा जलं स्थितम् । जलसीमाप्रदेशभूमेरुच्चता लक्षषष्टिसहस्रयोजन-परिमिता । भूमिमारभ्य ध्रुवमण्डलपर्यन्तं पञ्चदशलक्षयोजनानि । तदुपरि महर्लोकं कोटियोजनम् । तदुपरि जनलोकं योजनकोटिद्वयपरिमितम् । तदुपरि तपोलोकं अष्टकोटियोजनपरिमितम् । तदुपरि सत्यलोकं अष्टचत्वारिं-शत्कोटियोजनपरिमितम् । एवं षष्टिकोटियोजनसमुन्नतम् । विस्तारः

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाशत्कोटिपरिमितः। लक्षशतद्वयपञ्चाशत्कोटियोजनसंख्यया वर्तुलाकारेण ब्रह्माण्डमेकम्।

"एतदण्डकटाहेन
तिर्यक् चोर्ध्वमधः क्रमात्।
कपित्थस्य यथा बीजं
सर्वतो वै समावृतम्"॥ इति।

सकलचेतनाधारमण्डं कपित्थस्य फलं बीजानीव प्राकार्यं समावृत्य तिष्ठति। तद्वत् सुवर्णकटाहेन पूर्वोक्तदेवासुरमानुषरूपसकलप्रपञ्चमावृत्य एतदण्डकटाहं कोटियोजनानां दलेनावृत्य स्थितं पृथिवीतत्त्वम्। दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतमिति तदावृतं पृथिवितत्त्वम्। दशकोटियोजनानां दलेनावृत्य स्थितं जलतत्त्वम्। तदम्बुपरिधानोऽसौ वह्निना परिवेष्टितं तदावृतं जलतत्त्वम्। शतकोटियोजनानां दलेनावृत्य स्थितमग्नितत्त्वम्। वह्निश्च वायुना वायुर्मैत्रेयनभसावृत इति। तदावृतं वह्नितत्त्वं सहस्रकोटि-योजनानां दलेनावृत्य स्थितम्। वायुतत्त्वं दशसहस्रकोटियोजनानां दलेनावृत्य स्थितम्। आकाशतत्त्वं भूतादिना नभसापि महता परिवेष्टितमिति, तदावृतमाकाशतत्त्वम्। शतसहस्रकोटियोजनानां दलेनावृत्य स्थितमहङ्कार-तत्त्वम्। तदहङ्कारतत्त्वं दशलक्षकोटियोजनानां दलेनावृत्य स्थितं महत्तत्त्वम्। एवं प्रकृतिविकारपृथिव्याद्यावरणसप्तकं च दशोत्तरस्यावरणानि चेति वाक्यं गृहीतम्।

एवं प्रकृतिसङ्गस्यामलरूपस्य देहिन इत्यनादिकर्मवासनारुचिभिः प्रकृति-वशगाः सन्तो देवतिर्यङ्मनुष्यादिशरीराण्यवलम्ब्य गर्भजरामरणादिक्लेशाननुभूय स्थितान् चेतनान् श्रीमन्नारायणः स्वस्य निर्हेतुकदयाकटाक्षसुधास्पर्शेन सदा-

CC-0. In Public Domain. Digitization by eGangotri

चार्यसंश्रयणं कारयित्वा तत्परिगृहीततया "लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" इति अस्पष्टसंसारगन्धो भूत्वा सर्पमुखलग्नमण्डूकवत् कोटिद्वयलग्नाग्निकाष्ठमध्यस्थपिपीलिकावत् संसारस्थितिमतिदुःसहां मत्वा प्राप्यदेशे सुखानुभवं कदा करिष्यामीति गमनत्वरावतोऽधिकारिणः परमपदस्य दशाकाले श्रीवैकुण्ठनाथः नित्यमुक्तानाहूय पुरशोभां कुरुतेति नियोजितवान्। तत्प्रकारेण "अलङ्कारविधिं कृत्स्नं कारयामास वेश्मन" इतिवत् श्रीरघुनायकस्य पट्टाभिषेकार्थं श्रीअयोध्या यथालङ्कृता तद्वत् सदानन्दमयं सर्वालङ्कारालङ्कृतं परं पदं माणिक्यमयस्तम्भशोभिताभरणैर्मुक्तादामभिर्गम्भीरपताकाभिरलङ्कृत्य धूपदीपदिव्यगन्धदिव्याञ्जनदिव्यचूर्णदिव्यमाल्यादिमङ्गलद्रव्याणि सर्वाणि सङ्गृह्य तदनन्तरमादिवाहकानाप्तवान्। ते च सुदर्शनशङ्खवर्णज्ञाननियमप्रियकार इति नामसंयुक्ताः विष्णुदूताश्चत्वारस्ते च पूर्वस्निग्धजनवत् प्रत्यक्षं गत्वा तं गृहीत्वा गमनकाले बाह्यकरणमन्तःकरणैः संयुक्तं कृत्वा अन्तःकरणं प्राणसंयुक्तं कृत्वा भूतसूक्ष्मविशिष्टोऽयं वासुदेवः तरुच्छायामाश्रित्य विश्रामं कृत्वा प्रयाणपाथेयं पुण्डरीकाक्षनामसङ्कीर्तनामृतद्वयमन्त्रमेव पाथेयं कृत्वा श्रीरङ्गराजं मार्गसहायं कृत्वा विरजातीरं तिलवृक्षं लक्ष्मीपद्मसरश्च विश्रामदेशं कृत्वा रत्नमण्डपमावासदेशं कृत्वा अर्चिरादिपुरुषान् सम्भाषणयोग्यान् कृत्वा प्राप्यदेशं कदा प्राप्स्यामीति प्रीत्यतिशयेनानादिकालं स्वात्मानं विदन् कृतसंसारं नरकपुरमिव स्मृत्वा एकाक्ष्येककर्णिकादिराक्षसस्त्रीभिः सहवासं त्यक्त्वा लङ्कामध्यादुत्तीर्यागता सीतेव अयमात्मा च हृदयादुत्तीर्य "शतं चैका हृदयस्य नाड्य" इति तद्गतैकोत्तरशतनाडीषु सुषुम्नेति नामसंयुक्तोर्ध्वनाड्या विद्यामाहात्म्येन च देवयान॰ स्मृत्या च प्रपन्नः हार्दपुरुषगृहीतदीपज्वालामिवानुस्मृत्य

"ओंकाररथमारुह्य मनःप्रग्रहवान्नरः।
विज्ञानं सारथिं कुर्यात्तद्विष्णोः परमं पदम्"।

CC-0. In Public Domain. Digitization by eGangotri

इतिवत् प्रणवमिति रथमारुह्य मनसि सारथ्ये कुर्वाणे सति गमनकाले द्रष्टुमशक्यादित्यमण्डलस्य एकः सूर्यवद् भेदनं कृत्वा अमृतात्मकचन्द्रसमीपे गत्वा तेन सत्कृतो भूत्वा स्थूलशरीरं विहाय सूक्ष्मशरीरमवलम्ब्य गमनसमय आदिवाहको भूत्वा चतुर्दिक्षु परिवेष्टनं कृत्वा आगमनसमये अर्चिरहः शुक्लपक्षः षण्मासाश्च संवत्सरो वायुः भास्करचन्द्रमसवह्निविद्युदु(द?)कानीन्द्रं प्रजानां पतिमिति एतल्लोकाधिदेवताः सत्कृत्य स्वसीमास्वप्रदेशपर्यन्तं सह प्रस्थितः। एतत्प्रकारेण गत्वा ब्रह्माण्डं च तदावृतं पृथिव्यादिमहत्तत्त्वानि भित्त्वा गमनकाले एकः मार्गोऽस्ति। तमुल्लङ्घ्य तदुपरि गमनकाले महासमुद्रास्त्रयः सन्ति। तानुल्लङ्घ्य तदुपरि गमनसमये पुण्यतीर्थो नद्यस्ति। तां नदीमुल्लङ्घ्य कियद्दूरं गमनकाले गते सति एको मोक्ष इति मार्गोऽस्ति तत्पूर्वोक्तमार्गेभ्यः शतगुणमधिको भूत्वा स्थितः। तमुल्लङ्घ्य कोटियोजनमुपरिगते सति पुण्यवृक्षसमाकीर्णो भूत्वाऽतिमनोहरो भूत्वा एकाश्रमभूम्यां भगवत्सङ्कीर्तनघोषः स्थितः। तदाश्रमं प्रविश्यानेकयोजने गते सति विष्णुलोकोऽस्ति। स विष्णुलोकः पूर्वोक्तसमस्तलोकेभ्यः सहस्रगुणितो भूत्वा स्थितः। स च अत्याश्चर्योऽत्युन्नतोऽतिशोभनोऽतिविचित्रनित्यनिरतिशयसुखार्हो भूत्वा नानारत्नखचितमाणिक्यमयस्तम्भशोभितहेमप्रासादादिभिः प्रज्वलितो भूत्वा विभवैरुपवनैरलङ्कृतो भूत्वा चतुर्द्वारसमेतो भूत्वा स्थितः। तद्द्वाराणां नामानि, आत्मसमष्टिः, प्रकृतिसमष्टिः, कैवल्यसमष्टिः, धर्मसमष्टिश्च। तत्पुरःस्थितिरूपेण स्थिताः अत्र मूलप्रकृतिविचयं कृत्वा स्थितवान्। एवंप्रकारेण महाशक्तियुक्तमूलप्रकृतेरुच्छ्वासनिश्वासयोः काले ब्रह्मणः प्रलयं सृष्टिश्च भवति।

CC-0. In Public Domain. Digitization by eGangotri

बोद्धा बोधमया सच्चासच्चेदं विश्वबुद्बुदम् ।
उदिता वा प्रलीना वा अविकाराय कल्पते ।।

इत्युक्ततयैतन्मूलप्रकृतिमाहात्म्यम् । एवं महासत्त्वयुक्तायाः मूलप्रकृतेः दिव्यतेज इत्यावर्तनं जाग्रत्तया उल्लङ्घ्य तल्लोकं त्यक्त्वा अर्चिरादिमार्गे कोटित्रययोजनानि गते सति पूर्व स्वयं संसारे स्थितिसमये गमनमार्गे चान्धकारावृतो भूत्वा छायोदकेन रहितो भूत्वा 'भीतोऽस्म्यहं महादेव श्रुत्वा मार्गस्य विस्तर'मितिवत् श्रवणमात्रेणातिभीतियुक्तो क्रूरमार्गे यमभटानां पाशबन्धनैः पुत्रदारादिपाशबन्धबद्धो भूत्वा यमदूतैर्गृहीतो भूत्वा अधोमुखं कृत्वाकृष्य गमनसमये श्वानः जानुजङ्घामांसानि खादन्ति । शक्तिसंयुतामरसायकशूलमुद्गराद्यायुधैस्ताडयन्ति । व्याघ्रकङ्ककाकराक्षसमुखानामाहारो भूत्वा सर्वाङ्गरक्तयूपधारासंयुक्ते सति क्षुत्तृष्णातिशयेन यमदूतानन्नपानादिकं याचमाने सति ते निर्दयाः सन्तो नासिकां मुखमोष्ठं दन्तान् छित्वा हस्तपादयोर्भङ्गं कृत्वा सम्यग्बध्वा गात्रशोषणं कृत्वा गृहीतः गतसमये दुःखं निर्वृत्य सुखोत्तरमार्गे तत्तल्लोकाभिरामाभिः सर्वाभिः आगत्य तैरर्पितान् वित्तानुचितान् अङ्गीकृत्यातित्वरया गत्वा शब्दस्पर्शादिसिंहव्याघ्रानां मुखानुल्लङ्घ्य संसारमिति महाकुञ्जरमुत्तीर्य तापत्रयमिति काराग्निसंयुक्ततापनिवृत्यर्थं ततस्तु विरजातीरप्रदेशं संगच्छति । गत्वा ततो विरजां, विमुञ्चति तनुं सूक्ष्मम् । ततो"मानवस्पर्शक्षालितवासना सुकृतिनो गच्छन्ति विष्णोः पदः"मितिवत् विरजामृतप्रवाहे स्नानं कृत्वा तन्नदीतरणं मनोवेगेन कृत्वा,

"प्रणवो धनुः शरश्चात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" ।।

इतिवत् विरजानदीमुत्तीर्य अश्वत्थवृक्षच्छायायां स्थितानाममानवानां श्रीहस्तस्पर्शात् सूक्ष्मशरीरं विमृज्य सूर्यकोटिरेककाले उदयान्वितो यथा, दिव्यशरीर-

CC-0. In Public Domain. Digitization by eGangotri

मवलम्ब्य चतुर्भुजो भूत्वा शङ्खचक्रगदाद्यनेकदिव्यायुधानि धृत्वा गर्भजन्मजरामरणादिदुःखानि क्षुत्पिपासाहङ्कारममकारदारिद्र्याशासूयारागद्वेषानादिकर्मवासनादिरुचिं त्यक्त्वा भयरहितो भूत्वा लावण्ययौवनसौकुमार्यादिकल्याणगुणगणाकरः शुद्धसत्त्वात्मकभगवदनुभवैकपरिकरविग्रहयुक्तः सन् कृतार्थो भूत्वा अमानवानां प्रदक्षिणं कृत्वा तेषामनुज्ञया तदुपरि लक्षयोजनानि गते सति एको महार्जुनवृक्षः षष्टिसहस्रयोजनविस्तीर्णः, लक्षयोजनोन्नतः। तस्य वृक्षस्य मूले चतुर्भुजं महातेजसं नीलमेघनिभप्रभं देवमनन्तं दृष्ट्वा दिव्यदेहं शुभावहं, एवं प्रभावसंयुक्तान् देवमानवान् संदृश्य तेषामनुज्ञया तदुपरि पञ्चाशद्योजनानि गते सति एका सर्वतीर्थेति नद्यस्ति। सा नदी शतयोजनविस्तीर्णप्रवाहा। तन्नदीतीरे सिद्धसार इत्येको वृक्षोऽस्ति। तस्य विस्तारः— सहस्रद्वययोजनानि उन्नतिः, षठिसहस्रयोजनानि विस्तीर्णः। तस्य वृक्षस्य मूले विष्णुमानवा इति दिव्यपुरुषाः सन्ति। तेषां प्रणामादिकं कृत्वा प्रदक्षिणमागत्य तेषामनुज्ञया तदुपरि षष्टिशतयोजनानि गते सति एका नदी शतयोजनविस्तारेण प्राकृतजलं वहतीति तामुत्तीर्य विशिष्टवेषे सति स एव सन् स्वयं यथा न प्रकाशते तथावस्थितिः तन्नदीस्नानेन भगवदैक्यज्ञानं च। दिव्यतेजसा एको मूर्तिमान् भूत्वा स्थितः। तद्दर्शनं कृत्वा तदुपरि शतयोजनानि गते सति एकलक्षविंशतियोजनानां विस्तारेण लक्ष्मीपद्मसर इत्येका पुष्करिण्यस्ति। तत्पुष्करिणीतटे लक्षयोजनोन्नतः पञ्चाशद्योजनविस्तीर्णस्तिलवृक्षोऽस्ति। तस्य वृक्षस्य सम्बन्धेन तिलपुष्करिणीति प्रसिद्धिः। तत्पुष्करिणीसमीपं गत्वा स्नानं कृत्वा स्नानादनन्तरं निरतिशयसुखरूपनिरवद्यः सन् ज्ञानानन्दामलस्वरूपभगवद्गुणानुसन्धानमेव धारकपोषकभोग्यं कृत्वा स्थितिः। तदवस्थः सन् तिलवृक्षच्छायावस्थानसमये श्रीवैकुण्ठदिव्यपरिसरवर्तिनः आनेतुमागताः अनेकप्रकारदिव्याभरणविभूषिताः दिव्यस्त्रियः,

CC-0. In Public Domain. Digitization by eGangotri

नवरत्नखचितहेमदण्डचामराणि गृहीत्वागताः शतसंख्याः। नवरत्नकीलितहेमदण्डचामराणि गृहीत्वागताः स्त्रियः शतम्। नवरत्नखचितहेमदण्डसंयुक्तव्यजनहस्ताः शतं स्त्रियः। सर्वाभरणभूषिता नर्त्तक्यः शतमागताः। कनकदीपान् गृहीत्वागताः स्त्रियः शतम्। मङ्गलाशासनपरा भूत्वा स्त्रियः शतम्। स्तुतिपशः स्त्रियः शतम्। लावण्ययौवनविलासपरिपूर्णा भूत्वा दिव्याम्बराणि धृत्वा वस्त्रव्यजनसंयुक्ताः स्त्रियः शतम्। दिव्यविचित्रनानापुष्पसंयुक्ताः स्त्रियः शतम्। पूर्णकुम्भदिव्यमाल्यश्रीचूर्णलाजादिमङ्गलद्रव्याणि गृहीत्वागताः स्त्रियः पञ्च शतानि। देवडुंडुभ्यादिदिव्यानि वाद्यानि वादयित्वागताः स्त्रियः शतम्। दिव्यगानसङ्कीर्तनवत्यः स्त्रियः शतम्। घण्डासहितपताका गृहीत्वा शतमागताः। दिव्यमाल्यादिधारणं कृत्वा अलङ्कारसमूहैरागताः स्त्रियो दशसहस्राणि। पुष्पवृष्टिकारिण्यः सहस्रम्। सामगानघोषं दिव्यप्रबन्धघोषं च कृत्वागता दिव्यपुरुषाः दशसहस्राणि। नवरत्नखचितमाणिक्यस्तम्भशोभितं मुक्तादामकिङ्किणीरणरणत्कारयुक्तं पताकासहितं दिव्यविमानं गृहीत्वा गरुडस्यागमनसमये तं परिवेष्ट्य दिव्यविमानानि दशसहस्राणि। महालक्ष्म्या निजमूलपरिकरदिव्यस्त्रीशतमागत्य तिलवृक्षपुष्करिणीतटस्थवृक्षमूले सकलतापरहितो भूत्वा स्थितं मुक्तात्मानम् अनादिकालसंसाररोगभुक्तो भूत्वा तन्निवर्तितपुत्रं (?) आरोग्यस्नानं कारयन्त्यो यथा मातरस्तद्वत् मुक्तात्मानमभिषिच्य दिव्याम्बराणि परिधाय दिव्यभूषणैरलङ्कृत्य दिव्यमाल्यान्यवधृत्य दिव्याञ्जनदिव्यचूर्णैरलङ्कृत्य कैङ्कर्यपट्टाभिषेकं कृत्वा कर्पूरारतिं समर्प्य पुष्पकोपर्यारोप्य समुद्रघोषवत् वाद्यध्वनिं कृत्वा सामगानदिव्यप्रबन्धानुसन्धानकरणकाले आशानिवृत्तो भूत्वा सर्वेन्द्रियाणि जित्वा अण्डाद्यावरणानि भित्वा अनन्तलोकानुल्लङ्घ्यागतो महाशूर इति सर्वैरुच्चैः स्तूयमानः सन् श्रीवैकुण्ठसमीपं गत्वा तत्समये अत्युज्ज्वलगोपुराणि हेममयनवरत्नखचितरूपश्रीप्राकारश्चातिमनोहरोऽत्युन्नतोऽवाङ्मनसगोचरो विविधा

CC-0. In Public Domain. Digitization by eGangotri

विचित्रसंयुक्तप्राकारनिबद्धा घण्डाश्च पताकाश्च आत्मानं उद्दिश्यप्राप्यदेशोऽयमेवागच्छ आगच्छेति हस्तान् प्रसार्याह्वानवन्तो नृत्यन्ति ।

इरुप्पडुवैकुण्ठं तद्गोपुरद्वारं प्रविश्य "वैकुण्ठदिव्यनगराय नमः" इति प्रणामं समर्प्य द्वारे स्थिताः मुडितुडवान्नर इति दिव्यपुरुषाः सन्ति, तान् प्रति नमस्कृत्यागते सति अनेकलक्षप्राकाराश्चोद्यानानि वनानि च माणिक्यमरकततोरणानि मुक्तामयमण्डपानि वीरसिंहासनानि केलिमण्डपसहिताः वीथीः प्रविश्य कोटियोजनगमनानन्तरं महाप्राकार इति, एकरूपमिति प्राकारश्च तिरुवकुडचंड इति एकः प्राकारश्च, वैजयन्तीत्येकः प्राकारः, त्रिविक्रमित्येकः प्राकारः, पुष्यराग इत्येकः प्राकारः, एकः प्रवालप्राकारः, नवरत्नखचित एकः प्राकारः, इन्द्रनीलमाणिक्यप्राकाराश्च, मौक्तिकप्राकारश्च, मलयानिलप्राकारश्च, चक्रप्राकारः, क्षीराब्धिः इत्येकः प्राकारः, एको माणिक्यप्राकारः, अनन्त इत्येकः प्राकारः इत्यादि शतसहस्रावरणानीति श्रुत्युक्तप्रकारेणात्युन्नताः गोपुरद्वारादिषु स्थिताः ।

प्राकारे अनेकतलद्वारेषु स्थितानां पुरुषाणां नामानि तपोधना इति तीर्थपुरनिरता इति च तिरुमालडिपार्वल इति च मधुविरुधुनामुडिमाधयुतमर इति च गोविन्दताण्डवर इति श्रीवैकुण्ठदास इति च जयमुडिमान् इति च तत्त्वयडिनविलयु इति वेदं च पुरारीति च शङ्खनिधिपद्मनिधिरिति च मकरिताण्डवरिति च मुडितोंड इति च अवहृतोंड इति च नैवमणिमुडिमाधयु इति च तलश्रीद्वारेषु सन्तः, भूतभविष्यद्वर्तमान ईश्वरश्च लीलाकारणविनोदसृष्टिस्थितिसंहारान् ज्ञात्वा, सर्वज्ञा भूत्वा तिष्ठन्ति । तान् नमस्कृत्य वीथीः प्रविश्य अनेककोटियोजनगतसमये विविधविचित्रवस्त्रालङ्कारान् मुक्तामयरङ्गवल्लीकनकविचित्रपात्राणि च पूर्णकुम्भाश्च नवरत्नखचितहेमपात्रेपु मङ्गलारतिं

CC-0. In Public Domain. Digitization by eGangotri

संस्थाप्य स्वस्वगृहद्वारप्रवेशसमये आरात्रिकं कृत्वा आशिषः कृत्वा हस्तान् प्रसार्य स्तोत्राणि कुर्वन्ति । केचित् नृत्यन्ति । केचन गायन्ति । सन्तोषातिशयेन निर्विकारा भूत्वा सन्ति केचन । अस्मिन् समये विष्वक्सेनादिनित्यवर्गाश्च सर्वे स्वात्मगृहान् प्रतिगृहीत्वा गत्वा दिव्यसिंहासने संस्थाप्य निम्नस्थाने स्थित्वा नवरत्नखचितपात्रं निधाय कनककलशैर्वासितोदकमादाय स्वभार्यासहिताः पादप्रक्षालनं कृत्वा प्रोक्षणं कृत्वा पूजनं च कृत्वा दिव्यगन्धानुलेपनदिव्यमाल्यादिभिरलंकृत्य- धूपदीपमधुपर्कनैवेद्यताम्बूलाद्युपचारान् कृत्वा कर्पूरारतिं कृत्वा व्यजनं समर्प्य तत्तीर्थं स्वीकृत्य अस्मद्देशस्यैकनायकरत्नं लब्धमिति स्वस्वभार्यां प्रति उक्त्वा उपलालनं कृत्वा प्रोक्षिते सति गत्वा मणिमण्डपसमीपं गत्वा पुष्पकादवतीर्य "आनन्दमयाय दिव्यरत्नमण्डपाय नमः" इति दण्डं समर्प्य स्थिताः ।

मणिमण्डपप्राकारः किंविशिष्ट इति चेत्, देदीप्यमानमाणिक्यस्तम्भाः अनेककोटयः विविधविचित्रशिल्पयुक्ताः वज्रवैडूर्यसोपानपङ्क्तियुक्ताः । अनेककेलीमण्डपानि च । कमलकल्हारनीरजादिपुष्पयुक्तसरांसि च । वीरसिंहासनानि च । कल्पवृक्षादितरुसमूहयुक्तश्रृङ्गारपुष्पवनानि च । तद्वनेषु स्थितानां शुकपिकादिपक्षिसंघानां मृदुमधुरालापानन्दकरं भूत्वा अतिमनोहरं भूत्वा दिव्यतेजोरूपं भूत्वा पञ्चोपनिषन्मयं भूत्वा अतिसुखावहमवाङ्मनसगोचरं सकलसम्पत्समृद्धं भूत्वा अनन्तकोटिब्रह्माण्डेषु स्थिता आत्मकोटयः एककोणस्यापि न पूरणक्षमविशालतासंयुक्ताः । एवंभूतं सनत्कुमारसनकसनन्दनादिपरमयोगीश्वराणां च ब्रह्मेन्द्रादिदेवतानां च ध्यातुमत्यन्तदूरमितिवत् स्मरणस्य गोचरं भूत्वा स्थितं "तद्विष्णोः परमं पद"मिति च "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति "ते ह नाकं महिमान" इति "जगदादिरनादिस्त्वं जगदीशं च ईश्वर"मिति वैकुण्ठभोगनायकस्थितमणिमण्डपमध्ये

CC-0. In Public Domain. Digitization by eGangotri

स्थितमेककारणयोगपद्ममस्ति। तत्पद्मस्य ज्ञानबलैश्वर्यशक्तीति चतुष्टयान्दोलनविज्वरा (?) भूत्वा सन्ति। तद्गुणानामुपरि विमला उत्कर्षणी ज्ञानं क्रिया योगा प्रह्वी सत्या अनुग्रहा ईशाना एता नव शक्तयश्चामराणि गृहीत्वा तिष्ठन्ति। अनुग्रहे लक्ष्मीसमाना अष्ट महिष्यस्तिष्ठन्ति। तन्मध्ये कर्णिकायामनन्तानेकचन्द्रमविग्रहवत् शैत्यसंयुक्तशरीरा भूत्वा कल्याणगुणनामाश्रयतया सर्वविधकैङ्कर्येषु चाधिकृता सन्तः। कैङ्कर्याणामुत्तमपङ्क्तिवत् स्थितः अनपायानन्त इति च शेष इति नामान्यवलम्ब्य भगवदनुभवप्रवाहप्रकाशार्थं सहस्रवदनानि द्विसहस्रजिह्वासंयुक्तः सन् नानामिलितपरिमलसौरभेन श्रमहरो भूत्वा सुखतरो भूत्वा अतिमनोहरो भूत्वा मन्दानिलसेव्यो भूत्वा अतिशोभितोऽत्युन्नतोऽनुपमो भूत्वा स्थितः शेषोऽहिः स्वशरीरं त्रिवलयवलितं कृत्वा स्थितः। सिंहासनं च द्वात्रिंशल्लक्षयोजनदीर्घं च दशलक्षयोजनोन्नतं च। विंशतिलक्षयोजनविशालतासहितो भूत्वा एककाले सहस्रसूर्योदयवत् सहस्रफणमणिज्योतिर्मण्डलमध्यस्थितशय्योपरि सकलजगदुदयस्थितिसंहाराणां कारणं भूत्वा अवाप्तसमाप्तकामो भूत्वा श्रियः पतिर्भूत्वा श्रीपुण्डरीकाक्षो भूत्वा श्रीकौस्तुभादिदिव्यभूषणभूषितो भूत्वा शङ्खचक्रगदाशाङ्गर्द्यसंख्येयदिव्यायुधधरो भूत्वा आश्रितवत्सलो भूत्वा कारुण्यनिधिर्भूत्वा स्थितः दिव्यज्योतिर्मयः।

श्रीवैकुण्ठनायकस्य वामभागे अपरिमितदिव्यसौन्दर्यसौकुमार्यसौशील्यादिदिव्यकल्याणगुणसमृद्धा भूत्वा बाल्ययौवनमध्यस्था भूत्वा दिव्याम्बरदिव्यगन्धानुलेपनदिव्यमाल्याद्यलङ्कृता भूत्वा स्थिता महालक्ष्मीश्च। दक्षिणपार्श्वे तस्याः प्रतिबिम्बरूपे क्षमादिगुणैर्लक्ष्मीमतिशयित्वा दक्षिणे पार्श्वे भूनीले स्थिते। लक्ष्म्याः भूनीलयोर्मध्ये वामपादं कुञ्चयित्वा दक्षिणपादं प्रसार्य भोगासने स्थिते सति श्रीअनन्तपार्श्वस्थमुखारविन्दे दिव्यगन्धमास्वादयन्

CC-0. In Public Domain. Digitization by eGangotri

अनन्तस्यापि सर्वेश्वरस्य मुखचन्द्रमण्डलामृतधारा एव स्वस्य धारकपोषक-भोग्यरूपानङ्गीकृत्य सौरभ्यादिकल्याणनिधिर्भूत्वा स्थितः परमपदनायको मुक्तात्मानमानेतुम् । विष्वक्सेनादिनित्यवर्गश्च, चण्डःप्रचण्डश्च भद्रः सुभद्रश्च, जयो विजयश्च, धाता विधाता च, कुमुदः कुमुदाक्षश्च, शङ्कुकर्णो सर्वनेत्रश्च, पुण्डरीको वामनश्च, सुमुखश्च प्रतिष्ठितश्चेति अष्टदिक्पालकाश्च [illegible] अन्तरङ्गपरिकरदिव्याप्सरसश्च । मङ्गलद्रव्याणि गृहीत्वा निर्माणमण्डपस्य द्वा[illegible] स्थितं मुक्तमूर्तिं समर्पयित्वा अनेकविधिपूर्वकलालनं कृत्वा तं गृहीत्वा ईश्व[illegible] निकटे संस्थापनानन्तरं दिव्यज्ञानप्रसादलब्धो भूत्वा "समस्तपरिवारा[illegible] श्रीमन्नारायणाय नमः" इति दण्डप्रणामं समर्प्य हर्षपरवशानन्दनिर्भरो भूत्वा पुनः पुनः दण्डवत्प्रणामं समर्प्य अतिप्रीत्या गत्वा पादपीठे पादं निवेश्य स यदि दिव्यसिंहासनारोहणकाले समीपं दृष्ट्वा "अवाक्येनादर" इतिवत् आकारं त्यक्त्वा चन्द्रोदयदर्शितसमुद्रवद् विकृतो भूत्वा स्वात्मानं विहायानन्त-कालभोग्यदुःखं सर्वं निवर्तयितुं "अङ्के भरतमारोप्ये" तिवत् श्रीभरतमक्रूरमिवा लिङ्गनं कृत्वा प्रीत्यतिशयेन कोऽसि त्वमिति पृच्छति सति अहं ब्रह्मास्मीत्यहं महाराजकुमार इत्युक्ते, अनन्तरमेतत्पर्यन्तं किं कृतवानित्युक्ते शब्दादिभोगमेव कालक्षेपमिति स्थितः । तद्भोगफलेन किं दृष्टमित्युक्ते, स्वामिन् ! निर्हेतु-कदयोत्तीर्णोऽस्मीत्युक्तम् । उत्तीर्य पुनः किं करिष्यसीत्युक्ते तव जायमान-कृपाकटाक्षतया अभिमुखोऽस्मीत्युक्तम् । तदुपरि किं करिष्यसीत्युक्ते तत्र सेवाङ्गीकृता इत्युक्ते वस्तुतस्तु "आचार्यः स हरिः साक्षाद् गुरुरूपी न संशयः" इतिवत् त्वमेव सदाचार्यो भूत्वा आश्रयणयुक्तं कृत्वा इदं दर्शयित्वा त्वयैवाङ्गी-कृत इत्युक्तमिति वचनानन्तरं ईश्वरोऽपि मम सृष्टिव्यापारः सकलो जात इति प्रीतो भूत्वा, त्वं नरकानुभवं कृत्वा दुःखितो भूत्वा स्थितसमये

CC-0. In Public Domain. Digitization by eGangotri

अहमागत्य मुखदर्शनमात्रमपि न कृतं इन्द्रियपरवशो भूत्वा महाक्लेशादित्युप-लालित्य "प्रगटस्य यथा लाभः" इतिवत् मनोरथं लब्धं तत्रागमनेनायं देशः सनाथो जातः, अस्य स्थानस्य एकं नायकरत्नं लब्धमिति देशान्तरगतो भूत्वा "गन्तुं पुत्रं पितावद् उपलालित"वत् (?) कृपां कृत्वा अतिव्यामोहं कृत्वा महालक्ष्मीहस्ते दत्तं, "कंसवधानन्तरं श्रीकृष्णं दृष्ट्वा देवकी"वत् स्तन्यमुद्बोध्य सर्वाङ्गमभिषिच्य उद्धृत्यानेकचिह्नैरुपलालनानन्तरं कृतार्थो भूत्वा महाल-क्ष्मीदयया सर्वविधकैङ्कर्यं च कुर्विति नियोगकरणानन्तरं पर्यङ्कादुत्तीर्य अभिमुखो भूत्वा दिव्यसौन्दर्यमनुभूय लावण्यप्रवाहस्य सम्मुखे स्थातुमशक्यतया षष्ठभागं प्रत्यागत्य अपराङ्गसौन्दर्यं सर्वमनुभूय पुर्वाङ्गादनवद्यकाद् अपराङ्गकलह-मितिवत् पुनः सम्मुखे प्रत्यागतः सौन्दर्यतरङ्ग तद्वशीकृतवृत्तिर्भूत्वा अञ्जलिं गृहीत्वा प्रदक्षिणं कृत्वा नमस्कृत्य विस्मितहृदयो भूत्वा तत्परो भूत्वा हो हो अहो उहा अहमन्नमहमन्नमिति आनन्दपरवशो भूत्वा स्थितसमये श्रीवैकुण्ठ-नायकश्च स्वस्य कृपाकटाक्षवीक्षणैरीषत् स्मितपूर्वकं स्निग्धगम्भीरमाधुर्य-श्रीसूक्तैः समीपमाहूय स्वस्य श्रीपादकमलेन तस्य उत्तमाङ्गमलङ्कृत्य नित्यकैं-कर्यनियोगमवधारितवान् । महाप्रसादतया सर्वकालसर्वदेशसर्वावस्थास्वपि सर्वविधकैंकर्यं कुर्वन् कृतार्थो भूत्वा तिष्ठतीति ।

इत्यर्चिरादिमार्गवैभवं सम्पूर्णम्

CC-0. In Public Domain. Digitization by eGangotri